**त्रिंशाशगणनाक्रमः –**

कुजरविजगुरुज्ञशुक्रभागाः पवनसमीरणकौर्पिजूकलेयाः।

अयुजि युजि तु ते विपर्ययस्थाः ॥

अयुक्=विषमः, (अयुजि = विषमे राशौ ) पवन=५, समीरण=५, कौर्पि=वृश्चिकराशिः=८, जूक=तुलाराशिः=७, लेय=सिंहः=५, एते अंशाः कुज-रविज-गुरु-ज्ञ-शुक्राणां भागाः=अंशाः (त्रिंशांशाः) भवन्ति ।

युक्=समः (युजि=समराशौ) ते विपर्ययस्थाः = ते अंशाः ग्रहाश्च व्युत्क्रमेण त्रिंशांशाधिपाः भवन्ति।

| | | | | | | |
|---|---|---|---|---|---|---|
| विषमराशिषु | अंशाः | ५ | ५ | ८ | ७ | ५ |
| | अधिपाः | कुजः | शनिः | गुरुः | बुधः | शुक्रः |
| समराशिषु | अंशाः | ५ | ७ | ८ | ५ | ५ |
| | अधिपाः | शुक्रः | बुधः | गुरुः | शनिः | कुजः |

विषमराशयः - मेषः, मिथुनम्, सिंहः, तुला, धनुः, कुम्भः च ।

समराशयः - वृषः, कर्कः, कन्या, वृश्चिकः, मकरः, मीनः च ।

**विषमराशिषु** आदौ पञ्च अंशपर्यन्तं कुजस्य त्रिंशाशः। ततः अग्रे पञ्च अंशपर्यन्तं शनेः त्रिंशांशः। ततः परं अष्टौ अंशपर्यन्तं गुरोः त्रिंशांशः। ततश्च सप्त अंशपर्यन्तं बुधस्य त्रिंशांशः। अन्ते पञ्च अंशपर्यन्तं शुक्रस्य त्रिंशांशः च भवति । यथा -

| **विषमराशौ** त्रिंशांशगणनाक्रमः | | |
|---|---|---|
| त्रिंशांशसंख्या | त्रिंशांशप्रमाणम् | त्रिशांशाधिपः |
| १ | ०° - ५° | कुजः |
| २ | ५° - १०° | शनिः |
| ३ | १०° - १८° | गुरुः |
| ४ | १८° - २५° | बुधः |
| ५ | २५° - ३०° | शुक्रः |

**समराशिषु** आदौ पञ्च अंशपर्यन्तं शुक्रस्य त्रिंशाशः। ततः अग्रे सप्त अंशपर्यन्तं बुधस्य त्रिंशांशः। ततः परं अष्टौ अंशपर्यन्तं गुरोः त्रिंशांशः। ततश्च पञ्च अंशपर्यन्तं शनेः त्रिंशांशः। अन्ते पञ्च अंशपर्यन्तं कुजस्य त्रिंशांशः च भवति । यथा -

| **समराशौ** त्रिंशांशगणनाक्रमः | | |
|---|---|---|
| त्रिंशांशसंख्या | त्रिंशांशप्रमाणम् | त्रिशांशाधिपः |
| १ | ०° - ५° | शुक्रः |
| २ | ५° - १२° | बुधः |
| ३ | १२° - २०° | गुरुः |
| ४ | २०° - २५° | शनिः |
| ५ | २५° - ३०° | कुजः |

उदाहरणम् – रविः-२ˢ-८°-२५'-५८'' | मिथुनराशौ रविः वर्तते। मिथुनं विषमराशिः। तत्र द्वितीयत्रिंशांशे रविः वर्तते। विषमे राशौ द्वितीयत्रिंशांशाधिपः शनिः। अतः रविः शनित्रिंशांशे वर्तते। रवेः त्रिंशांशाधिपः शनिः।
चन्द्रः - ३ˢ-१८°-२५'-५८''। कर्काटकराशौ चन्द्रः वर्तते। कर्कः समराशिः। तत्र तृतीयत्रिंशांशे चन्द्रः वर्तते। समे राशौ तृतीयत्रिंशांशाधिपः गुरुः। अतः चन्द्रः गुरुत्रिंशांशे वर्तते। चन्द्रस्य त्रिंशांशाधिपः गुरुः ।

**श्लोकः – ९**

**द्रेक्काणहोरानवभागसंज्ञास्त्रिंशांशकद्वादशसंज्ञिताश्च।**

**क्षेत्रं च यद्यस्य स तस्य वर्गो होरेति लग्नं भवनस्य चार्धम्॥**

षड्वर्गाः अस्मिन् श्लोके निरूप्यन्ते। ते यथा – १. क्षेत्रम्, २. होरा, ३. द्रेष्काणः, ४. नवांशः, ५.त्रिंशांशः, ६.द्वादशांशः चेति।

एतेषु षट्सु यः ग्रहः यस्य राशेः/ ग्रहस्य वा क्षेत्रादिषु भवति सः ग्रहः तस्य राशेः /ग्रहस्य वा वर्गे भवति इति व्यवह्रियते।

होरा=लग्नम् अथवा होरा=राशेः अर्धम्।

**श्लोकः-१०**

**गोऽजाश्विकर्किमिथुना समृगा निशाख्याः**

**पृष्ठोदया विमिथुना कथिताश्च एव।**

**शीर्षोदया दिनबलाश्च भवन्ति शेषा**

**लग्नं समेत्युभयतः पृथुरोमयुग्मम्॥**

रात्रिबलिनः राशयः - वृषः, मेषः, धनुः, कर्कः, मिथुनम्, मकरः ।

पृष्ठोदयाः राशयः - वृषः, मेषः, धनुः, कर्कः, मकरः ।

शीर्षोदयाः राशयः - सिंहः, कन्या, तुला, वृश्चिकः, कुम्भः ।

उभयोदयः राशिः - मीनः ।

दिवाबलिनः राशयः - सिंहः, कन्या, तुला, वृश्चिकः, कुम्भः , मीनः।

**श्लोकः – ११**

**क्रूरः सौम्यः पुरुषवनिते ते चरागद्विदेहाः**

**प्रागादीशाः क्रियवृषनृयुक्कर्कटाः सत्रिकोणाः।**

**मार्तण्डेन्द्वोरयुजि समभे चन्द्रभान्वोश्च होरे**

**द्रेष्काणाः स्युः स्वभवनसुतत्रित्रिकोणाधिपानाम्॥**

ते मेषादयः राशयः क्रमेण क्रूर-सौम्याः, पुंस्त्रीलिङ्गकाः, चर-स्थिर-द्विस्वभावाश्च ज्ञेयाः, यथा -

| | | | |
|---|---|---|---|
| सौम्यः | क्रूरः | सौम्यः | क्रूरः |
| क्रूरः | | | सौम्यः |
| सौम्यः | | | क्रूरः |
| क्रूरः | सौम्यः | क्रूरः | सौम्यः |

| | | | |
|---|---|---|---|
| स्त्री | पुं | स्त्री | पुं |
| पुं | | | स्त्री |
| स्त्री | | | पुं |
| पुं | स्त्री | पुं | स्त्री |

| | | | |
|---|---|---|---|
| द्वि | चरः | स्थि | द्वि |
| स्थि | | | च |
| च | | | स्थि |
| द्वि | स्थि | च | द्वि |

क्रूराः - मेष-मिथुन-सिंह-तुला-धनुः-कुम्भाः ।

सौम्याः - वृष-कर्क-कन्या-वृश्चिक-मकर-मीनाः ।

पुरुषः - मेष-मिथुन-सिंह-तुला-धनुः-कुम्भाः ।


स्त्री - वृष-कर्क-कन्या-वृश्चिक-मकर-मीनाः ।

चरः - मेष-कर्क-तुला-मकराः ।

स्थिरः - वृष-सिंह-वृश्चिक-कुम्भाः ।

द्विस्वभावः - मिथुन-कन्या-धनु-र्मीनाः ।

दिशाम् आधिपत्यम् -




मेष-वृष-मिथुन-कर्काः स्वपञ्चम-नवमराशिभ्यां सहिताः पूर्व-दक्षिण-पश्चिम-उत्तरदिशाम् अधिपाः भवन्ति। यथा –

पूर्वदिशः अधिपाः - मेष-सिंह-धनूराशयः ।

दक्षिणदिशः अधिपाः - वृष-कन्या-मकरराशयः ।

पश्चिमदिशः अधिपाः - मिथुन-तुला-कुम्भराशयः ।

उत्तरदिशः अधिपाः - कर्क-वृश्चिक-मीनराशयः ।

**होराधिपतिनिर्णयः –**

राशेः अर्धं होरा । ३०$^{\circ}$÷२=१५$^{\circ}$ । एवं पञ्चदश अंशाः एकस्याः होरायाः प्रमाणम् । प्रत्येकं राशौ द्वे होरे भवतः । ०$^{\circ}$ - १५$^{\circ}$ पर्यन्तं प्रथमहोरा। १५$^{\circ}$ - ३०$^{\circ}$ पर्यन्तं द्वितीयहोर । समविषमराशिभेदेन होराधिपः निर्णीयते। यथा –

विषमराशौ प्रथमहोराधिपः - रविः, द्वितीयहोराधिपः - चन्द्रः ।

समराशौ प्रथमहोराधिपः - चन्द्रः, द्वितीयहोराधिपः - रविः ।

उदाहरणम् – रविः – २$^{S}$-८°-२५′-५८″ । अत्र रविः विषमे मिथुनराशौ प्रथमहोरायां वर्तते। अतः रविहोराधिपः रविः। अतः रविः स्वहोरायां वर्तते इति व्यवहारः।

कुजः – १$^{S}$-१८°-२५′-५८″ । अत्र कुजः समे वृषभराशौ द्वितीयहोरायां वर्तते। अतः कुजस्य होराधिपः रविः। एवं कुजः रविहोरायां वर्तते।

**द्रेष्काणाधिपतिनिर्णयः –**

राशेः त्रिभागः द्रेष्काणः । ३०°÷३=१०° । एवं दश अंशाः एकस्य द्रेष्काणस्य प्रमाणम् । प्रत्येकं राशौ त्रयः द्रेष्काणाः भवन्ति।

०° - १०° पर्यन्तं प्रथमद्रेष्काणः ।

१०° - २०° पर्यन्तं द्वितीयद्रेष्काणः ।

२०° - ३०° पर्यन्तं तृतीयद्रेष्काणः ।

स्व-पञ्चम-नवमाधिपाः क्रमेण प्रथम-द्वितीय-तृतीयद्रेष्काणानाम् अधिपाः भवन्ति।

| राशयः ↓ | **प्रथमद्रेष्काणः** | | **द्वितीयद्रेष्काणः** | | **तृतीयद्रेष्काणः** | |
|---|---|---|---|---|---|---|
| | **स्व**राशिः | अधिपतिः | **पञ्चम**राशिः | अधिपतिः | **नवम**राशिः | अधिपतिः |
| मेषः | मेषः | कुजः | सिंहः | रविः | धनुः | गुरुः |
| वृषः | वृषः | शुक्रः | कन्या | बुधः | मकरः | शनिः |
| मिथुनम् | मिथुनम् | बुधः | तुला | शुक्रः | कुम्भः | शनिः |
| कर्कः | कर्कः | चन्द्रः | वृश्चिकः | कुजः | मीनः | गुरुः |
| सिंहः | सिंहः | रविः | धनुः | गुरुः | मेषः | कुजः |
| कन्या | कन्या | बुधः | मकरः | शनिः | वृषः | शुक्रः |
| तुला | तुला | शुक्रः | कुम्भः | शनिः | मिथुनम् | बुधः |
| वृश्चिकः | वृश्चिकः | कुजः | मीनः | गुरुः | कर्कः | चन्द्रः |
| धनुः | धनुः | गुरुः | मेषः | कुजः | सिंहः | रविः |
| मकरः | मकरः | शनिः | वृषः | शुक्रः | कन्या | बुधः |
| कुम्भः | कुम्भः | शनिः | मिथुनम् | बुधः | तुला | शुक्रः |
| मीनः | मीनः | गुरुः | कर्कः | चन्द्रः | वृश्चिकः | कुजः |

उदाहरणम् – रविः – २ˢ-८°-२५′-५८″ । अत्र रविः मिथुनराशौ प्रथमद्रेष्काणे वर्तते। रविस्थित-मिथुनराश्यधिपतिः बुधः प्रथमद्रेष्काणाधिपः भवति। अतः रविः बुधद्रेष्काणे अस्ति। रविद्रेष्काणाधिपः बुधः इति व्यवहारः।

कुजः – १ˢ-१८°-२५′-५८″ । अत्र कुजः वृषभराशौ द्वितीयद्रेष्काणे वर्तते। वृषात् पञ्चमराशिः-कन्या। तदधिपः बुधः द्वितीयद्रेष्काणाधिपः भवति। अतः कुजः बुधद्रेष्काणे अस्ति। कुजद्रेष्काणाधिपः बुधः इति व्यवहारः।

**नवांशगणनाक्रमः –**

अज-मृग-तौलि-चन्द्रभवनादिक्रमेण नवांशविधिः ।

नवांशः= एकस्य राशेः नवमः अंशः । ३०÷९=३˚-२०' एतत् एकस्य नवांशस्य प्रमाणम् ।

| | | | |
|---|---|---|---|
| चन्द्रभवन.. | अज ... | मृग... | तौलि... |
| तौलि.. | नवांशगणनाक्रमः | | चन्द्रभवन... |
| मृग... | | | अज.... |
| अज.. | चन्द्रभवन... | तौलि... | मृग.... |

०˚ - ३-२० प्रथमः नवांशः

३-२० - ६-४० द्वितीयः नवांशः

६-४० - १०-०० तृतीयः नवांशः

१०-०० - १३-२० चतुर्थः नवांशः

१३-२० - १६-४० पञ्चमः नवांशः

१६-४० - २०-०० षष्ठः नवांशः

२०-०० - २३-२० सप्तमः नवांशः

२३-२० - २६-४० अष्टमः नवांशः

२६-४० - ३०-०० नवमः नवांशः

मेष-सिंह-धनूराशिषु - मेषराशिमारभ्य नवांशगणना । (मेषमारभ्य धनुःपर्यन्तम्)

वृष-कन्या-मकरराशिषु - मकरराशिमारभ्य नवांशगणना । (मकरमारभ्य कन्यापर्यन्तम्)

मिथुन-तुला-कुम्भराशिषु - तुलाराशिमारभ्य नवांशगणना । (तुलामारभ्य मिथुनपर्यन्तम्)

कर्क-वृश्चिक-मीनराशिषु - कर्कराशिमारभ्य नवांशगणना । (कर्कमारभ्य मीनपर्यन्तम्)

**उदाहरणम्** – रविस्फुटप्रमाणम् – ०$^s$-१२°-५८'-००'' | तर्हि रविः रवेः नवांशाधिपः कः ? अथवा – रविः कस्य ग्रहस्य नवांशे वर्तते ? इति प्रश्ने। तदा एवं कर्तव्यम्- आदौ रविः कस्मिन् राशौ वर्तते इति ज्ञातव्यम्। अनन्तरं तस्मिन् राशौ नवांशगणनाक्रमः कस्मात् राशेः आरभ्य भवति इति ज्ञातव्यम्। तदनु स्फुटं दृष्ट्वा कतमः नवांशः इति ज्ञात्वा तदनुसारेण कः अधिपतिः इति निर्णयः कर्तव्यः। अत्र रविः मेषराशौ वर्तते। मेषराशौ मेषमारभ्य नवांशगणना भवति। रविः चतुर्थे नवांशे वर्तते। अतः मेषराशौ मेषमारभ्य गणनावसरे चतुर्थः राशिः कर्काटकः। तस्य कर्कराशेः अधिपतिः चन्द्रः। अतः रविः चन्द्रस्य नवांशे वर्तते। रविनवांशाधिपतिः चन्द्रः इति व्यवहारः क्रियते।

**कोष्ठकवशात् नवांशज्ञानम्** -

| राशिः ↓ | नवांशसंख्या → | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 |
|---|---|---|---|---|---|---|---|---|---|---|
| | नवांशप्रमाणम् (up to) | 3°-20' | 6°-40' | 10° | 13°-20' | 16°-40' | 20° | 23°-20' | 26°-40' | 30° |
| | गणनाक्रमः ↓ | नवांशाधिपाः ग्रहाः | | | | | | | | |
| मेषः | मेषः - धनुः | कुजः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | कुजः | गुरुः |
| वृषः | मकरः - कन्या | शनिः | शनिः | गुरुः | कुजः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः |
| मिथुनम् | तुला – मिथुनम् | शुक्रः | कुजः | गुरुः | शनिः | शनिः | गुरुः | कुजः | शुक्रः | बुधः |
| कर्कः | कर्कः - मीनः | चन्द्रः | रविः | बुधः | शुक्रः | कुजः | गुरुः | शनिः | शनिः | गुरुः |
| सिंहः | मेषः - धनुः | कुजः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | कुजः | गुरुः |
| कन्या | मकरः - कन्या | शनिः | शनिः | गुरुः | कुजः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः |
| तुला | तुला – मिथुनम् | शुक्रः | कुजः | गुरुः | शनिः | शनिः | गुरुः | कुजः | शुक्रः | बुधः |
| वृश्चिकः | कर्कः - मीनः | चन्द्रः | रविः | बुधः | शुक्रः | कुजः | गुरुः | शनिः | शनिः | गुरुः |
| धनुः | मेषः - धनुः | कुजः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः | शुक्रः | कुजः | गुरुः |
| मकरः | मकरः - कन्या | शनिः | शनिः | गुरुः | कुजः | शुक्रः | बुधः | चन्द्रः | रविः | बुधः |
| कुम्भः | तुला – मिथुनम् | शुक्रः | कुजः | गुरुः | शनिः | शनिः | गुरुः | कुजः | शुक्रः | बुधः |
| मीनः | कर्कः - मीनः | चन्द्रः | रविः | बुधः | शुक्रः | कुजः | गुरुः | शनिः | शनिः | गुरुः |

अनेन कोष्ठकेन अस्माभिः प्रत्येकं राशौ नवांशाधिपाः ज्ञातुं शक्याः।


**उदाहरणम्** - चन्द्रस्फुटप्रमाणम् – १०$^{s}$-५°-२०'-००'' । चन्द्रः कुम्भराशौ द्वितीयनवांशे वर्तते। कुम्भराशौ नवांशगणना तुलाराशितः आरभ्यते। तुलातः गणनावसरे द्वितीयराशिः वृश्चिकः। तदधिपः कुजः चन्द्रनवांशाधिपः भवति।

**होराद्रेष्काणयोः विषये मतभेदः –**

**केचित्तु होरां प्रथमं भपस्य वाञ्छन्ति लाभाधिपतेर्द्वितीयाम्।**


**द्रेष्काणसंज्ञामपि वर्णयन्ति स्वद्वादशैकादशराशिपानाम् ॥१२॥**

तत्तद्राश्यधिपाः प्रथमहोराधिपाः, तत्तद्राशितः एकादशराश्यधिपाः द्वितीयहोराधिपाः भवन्ति इति केषाञ्चन आचार्याणां मतम्। तदनुसारेण –




| राशयः | होराधिपाः | |
|---|---|---|
| | प्रथमहोराधिपः (स्वराश्यधिपः) | द्वितीयहोराधिपः (लाभाधिपः) |
| मेषः | कुजः | शनिः |
| वृषः | शुक्रः | गुरुः |
| मिथुनम् | बुधः | कुजः |
| कर्कः | चन्द्रः | शुक्रः |
| सिंहः | रविः | बुधः |
| कन्या | बुधः | चन्द्रः |
| तुला | शुक्रः | रविः |
| वृश्चिकः | कुजः | बुधः |
| धनुः | गुरुः | शुक्रः |
| मकरः | शनिः | कुजः |
| कुम्भः | शनिः | गुरुः |
| मीनः | गुरुः | शनिः |

एवमेव स्व-द्वादश-एकादशाधिपाः प्रथम-द्वितीय-तृतीयद्रेष्काणाधिपाः भवन्ति इति अपि केषाञ्चन मतं वर्तते। तदनुसारेण प्रत्येकं राशौ तद्राश्यधिपाः प्रथमद्रेष्काणाधिपाः, तद्राशितः द्वादशराश्यधिपाः द्वितीयद्रेष्काणाधिपाः, तद्राशितः एकादशराश्यधिपाः तृतीयद्रेष्काणाधिपाः च भवन्ति। तद्यथा -




| राशयः | द्रेष्काणाधिपाः | | |
|---|---|---|---|
| | प्रथमद्रेष्काणाधिपः (स्वराश्यधिपः) | द्वितीयद्रेष्काणाधिपः (व्ययाधिपः) | तृतीयद्रेष्काणाधिपः (लाभाधिपः) |
| मेषः | कुजः | गुरुः | शनिः |
| वृषः | शुक्रः | कुजः | गुरुः |
| मिथुनम् | बुधः | शुक्रः | कुजः |
| कर्कः | चन्द्रः | बुधः | शुक्रः |
| सिंहः | रविः | चन्द्रः | बुधः |
| कन्या | बुधः | रविः | चन्द्रः |
| तुला | शुक्रः | बुधः | रविः |
| वृश्चिकः | कुजः | शुक्रः | बुधः |
| धनुः | गुरुः | कुजः | शुक्रः |
| मकरः | शनिः | गुरुः | कुजः |
| कुम्भः | शनिः | शनिः | गुरुः |
| मीनः | गुरुः | शनिः | शनिः |

**उच्चराशयः उच्चांशाः नीचराशयः नीचांशाश्च –**

अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः।


दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः॥ १३ ॥

रव्यादीनां ग्रहाणां क्रमेण मेष-वृष-मकर-कन्या-कर्क-मीन-तुलाराशयः उच्चराशयः भवन्ति। तेषां परमोच्चांशाः अपि क्रमेण १०, ३, २८, १५, ५, २७, २० च भवन्ति। यो राशिः यस्य ग्रहस्य उच्चराशिः भवति तस्मात् सप्तमः राशिः तस्य नीचराशिः भवति। एवमेव यो यस्य उच्चांशः तत्प्रमाणमेव नीचराशौ नीचांशः अपि भवति। तद्यथा -

| ग्रहः | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| उच्चराशिः | मेषः | वृषः | मकरः | कन्या | कर्कः | मीनः | तुला |
| उच्चांशः | १० | ३ | २८ | १५ | ५ | २७ | २० |

| ग्रहः | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
|---|---|---|---|---|---|---|---|
| नीचराशिः | तुला | वृश्चिकः | कर्कः | मीनः | मकरः | कन्या | मेषः |
| नीचांशः | १० | ३ | २८ | १५ | ५ | २७ | २० |

| | | | |
|---|---|---|---|
| शुक्रः २७ | रविः १० | चन्द्रः ३ | |
| | उच्चराशिः | | गुरुः ५ |
| कुजः २८ | उच्चांशः | | |
| | | शनिः२० | बुधः१५ |



| | | | |
|---|---|---|---|
| बुधः१५ | शनिः२० | | |
| | नीचराशिः | | कुजः २८ |
| गुरुः ५ | नीचांशश्च | | |
| | चन्द्रः ३ | रविः १० | शुक्रः २७ |

**वर्गोत्तमनवांशः मूलत्रिकोणराशयश्च -**

वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यन्ततः शुभफला नवभागसंज्ञाः।

सिंहो वृषः प्रथमषष्ठहयाङ्गतौलिकुम्भास्त्रिकोणभवनानि भवन्ति सूर्यात्॥१४॥

चरराशिषु प्रथमनवांशः, स्थिरराशिषु पञ्चमनवांशः, द्विस्वभावराशिषु अन्तिमनवांशः च वर्गोत्तमनवांशः इत्युच्यते। चरराशिषु मेष-कर्क-तुला-मकरेषु प्रथमनवांशः तेषामेव राशीनां भवति। एवमेव स्थिरराशिषु वृष-सिंह-वृश्चिक-कुम्भेषु प्रथमनवांशः तेषामेव राशीनां भवति। तथैव द्विस्वभावराशिषु मिथुन-कन्या-धनु-मीनेषु प्रथमनवांशः तेषामेव राशीनां भवति। अतः यो ग्रहः यस्मिन् राशौ भवति सः तस्य एव राशेः नवांशं यदि प्राप्नोति तर्हि सः वर्गोत्तमांशे वर्तते इति वक्तुं शक्यते।

| | | | |
|---|---|---|---|
| ९ | १ | ५ | ९ |
| ५ | वर्गोत्तम- | | १ |
| १ | नवांशः | | ५ |
| ९ | ५ | १ | ९ |

रव्यादीनां ग्रहाणां क्रमेण सिंह-वृष-मेष-कन्या-धनुः-तुला-कुम्भाः मूलत्रिकोणराशयः भवन्ति।

| | | | |
|---|---|---|---|
| | कुजः | चन्द्रः | |
| शनिः | मूलत्रिकोण | | रविः |
| | -राशयः | | |
| गुरुः | | शुक्रः | बुधः |

**लग्नादीनां भावानां संज्ञाविशेषाः –**

होरादयस्तनुकुटुम्बसहोत्थबन्धु-

पुत्रारिपत्निमरणानि शुभास्पदायाः।

रिःफाख्यमित्युपचयान्यरिकर्मलाभ-

दुश्चिक्यसंज्ञितगृहाणि न नित्यमेके॥ १५॥

| **भावाः** | लग्नम् | द्वितीयः | तृतीयः | चतुर्थः | पञ्चमः | षष्ठः | सप्तमः | अष्टमः | नवमः | दशमः | एकादशः | द्वादशः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **संज्ञाः** | तनुः | कुटुम्बः | सहोत्थः | बन्धुः | पुत्रः | अरिः | पत्नी | मरणम् | शुभः | आस्पदः | आयः | रिःफम् |

**उपचयभावाः** – अरि-कर्म-लाभ-दुश्चिक्यभावाः = ६-१०-११-३ भावाः उपचयाः। एतेषां चतुर्णां भावानां सर्वदा उपचयत्वं नास्ति इति केषाञ्चन आचार्याणां मतम्। तेषु भावाषु यदि शुभग्रहाः भवन्ति, अथवा तेषां भावानाम् अधिपाः यदि शुभग्रहाः तर्हि एव तेषाम् उपचयत्वम् इति तेषाम् आशयः।

कल्पस्वविक्रमगृहप्रतिभाक्षतानि

चित्तोत्थरन्ध्रगुरुमानभवव्ययानि।

लग्नाच्चतुर्थनिधने चतुरस्रसंज्ञे

द्यूनं च सप्तमगृहं दशमर्क्षमाज्ञा॥ १६॥

| **भावाः** | लग्नम् | द्वितीयः | तृतीयः | चतुर्थः | पञ्चमः | षष्ठः | सप्तमः | अष्टमः | नवमः | दशमः | एकादशः | द्वादशः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **संज्ञाः** | कल्पः | स्वम् | विक्रमः | गृहम् | प्रतिभा | क्षतम् | चित्तोत्थम् | रन्ध्रम् | गुरुः | मानम् | भवः | व्ययः |

**चतुरश्रभावः (चतुरस्रभावः)** – लग्नात् चतुर्थस्य अष्टमस्य च चतुरस्रम् इति संज्ञा ।

**द्यूनभावः** - लग्नात् सप्तमभावस्य द्यूनम् इति संज्ञा ।

आज्ञाभावः - लग्नात् दशमभावस्य आज्ञा इति संज्ञा ।

कण्टककेन्द्रचतुष्टयसंज्ञाः सप्तमलग्नचतुर्थखभानाम्।

तेषु यथाभिहितेषु बलाढ्या कीटनराम्बुचराः पशवश्च॥ १७॥

**केन्द्रभावाः** – सप्तम-लग्न-चतुर्थ-खभावाः = ७-१-४-१० भावाः **कण्टकभावाः=केन्द्रभावाः=चतुष्टयभावाः** इति वा उच्यन्ते। एतेषु केन्द्रभावेषु क्रमशः कीट-द्विपात्-जलचर-चतुष्पाद्राशयः बलिष्ठाः भवन्ति। अर्थात् लग्नात् सप्तमभावे कीटराशिः बलिष्ठः भवति, लग्नभावे द्विपाद्राशयः बलिष्ठाः भवन्ति, लग्नात् चतुर्थभावे जलचरराशयः बलिष्ठाः भवन्ति, लग्नात् दशमभावे चतुष्पाद्राशयः बलिष्ठाः भवन्ति इति।

**कीटराशिः** - वृश्चिकः ।

**द्विपाद्राशयः** - मिथुन-कन्या-तुला-धनुःपूर्वार्ध-कुम्भाः।

**जलचरराशयः** - कर्क-मकरपरार्ध-मीनाः ।

**चतुष्पाद्राशयः** - मेष-वृषभ-सिंह-धनुःपरार्ध-मकरपूर्वार्धाः ।

केन्द्रात्परं पणपरं परतश्च सर्व-

मापोक्लिमं हिबुकमम्बुसुखं च वेश्म।

जामित्रमस्तभवनं सुतभं त्रिकोणं

मेषूरणं दशममत्र च कर्म विद्यात् ॥ १८॥

**पणपरभावाः** - प्रत्येकं केन्द्रभावात् परवर्तिनः भावाः पणपरभावाः भवन्ति। एवं २-५-८-११ भावाः पणपरभावाः इत्युच्यन्ते।

**आपोक्लिमभावाः** - प्रत्येकं पणपरभावात् परवर्तिनः भावाः आपोक्लिमभावाः भवन्ति। एवं ३-६-९-१२ भावाः आपोक्लिमभावाः इत्युच्यन्ते।

**चतुर्थभावः** - हिबुकम्, अम्बु, सुखम्, वेश्म चेति चतुर्थभावस्य संज्ञाविशेषाः।

**सप्तमभावः** - जामित्रम्, अस्तभवनं चेति सप्तमभावस्य संज्ञाविशेषौ।

**पञ्चमभावः** - सुतभम्, त्रिकोणं चेति पञ्चमभावस्य संज्ञाविशेषौ।

**दशमभावः** - मेषूरणम्, कर्म चेति दशमभावस्य संज्ञाविशेषौ।

**भावबलनिरूपणम् –**

**होरा स्वामिगुज्ञवीक्षितयुता नान्यैश्च वीर्योत्कटा**
केन्द्रस्था द्विपदादयोऽह्नि निशि च प्राप्ते च सन्ध्याद्वये।
पूर्वार्धे विषयादयः कृतगुणा मानं प्रतीपं च तत्
दुश्चिक्यं सहजं तपश्च नवमं त्र्याद्यं त्रिकोणं च तत् ॥१९॥

होरा=लग्नं स्वस्वामिना गुरुणा बुधेन वा दृष्टा युता वा यदि भवति तर्हि वीर्योत्कटा=बलिष्ठा भवति। अन्यैः न = स्वामि-गुरु-बुधान् विना अन्यैः ग्रहैः युता दृष्टा वा भवति चेत् बलिष्ठा न भवति। अर्थात् –

लग्नं लग्नाधिपतिना **दृष्टं** चेत् , गुरुणा **दृष्टं** चेत् , अथवा बुधेन **दृष्टं** चेत् बलिष्ठं भवति। अथवा –

लग्नं लग्नाधिपतिना **युतं** चेत् , गुरुणा **युतं** चेत् , अथवा बुधेन **युतं** चेत् बलिष्ठं भवति।

एवमेव सर्वेषां भावानामपि बलं चिन्तनीयम्। यथा – द्वितीयभावः द्वितीयाधिपतिना गुरुणा बुधेन वा युतः दृष्टः वा चेत् बलिष्ठः भवति। तृतीयाधिपतिना गुरुणा बुधेन वा युतः दृष्टः वा तृतीतीयभावः बलिष्ठः भवति, इति।

तर्हि अत्र अयमर्थः सिद्ध्यति –

१. भावोपरि भावाधिपतेः
२. भावोपरि गुरोः
३. भावोपरि बुधस्य
} दृष्टिः


४. भावे भावाधिपतेः
५. भावे गुरोः
६. भावे बुधस्य
} स्थितिः (युतिः)


एवम् एतेषु षट्सु स्थलेषु भावाधिपः बलिष्ठः भवति। एतेषां क्रमशः उदाहरणं पश्यामः -


| | | | |
|---|---|---|---|
| | लग्नं | | |
| | १) | | |
| | लग्नाधिपदृष्टिः | | |
| | | कुजः | |

| | | | |
|---|---|---|---|
| | लग्नं | | |
| | २) गुरुदृष्टिः | | |
| | | | |
| | | गुरुः | |

| | | | |
|---|---|---|---|
| | लग्नं | | |
| | ३) बुधदृष्टिः | | |
| | | | |
| | | बुधः | |




**केन्द्रस्था, द्विपदादयोऽह्नि निशि च प्राप्ते च सन्ध्याद्वये –**

द्वादशसु भावेषु केन्द्रस्थाः भावाः = केन्द्रभावाः अत्यन्तं बलिष्ठाः भवन्ति, पणपरभावाः सामान्यतया बलिष्ठाः भवन्ति (केन्द्रभावापेक्षया बलहीनाः भवन्ति), आपोक्लिमभावाः अत्यन्तम् अल्पबलाः भवन्ति (केन्द्र-पणपरभावापेक्षया बलहीनाः भवन्ति) ।

द्विपदादयः=द्विपाद्राशयः चतुष्पाद्राशयः कीटराशिः च, क्रमेण अह्नि प्राप्ते=दिवाकाले समागते, निशि=रात्रिकाले समागते, सन्ध्याद्वये पाप्ते= सन्ध्याकाले समागते च बलिष्ठाः भवन्ति। अर्थात् द्विपाद्राशयः दिवाकाले, चतुष्पाद्राशयः रात्रिकाले, कीटराशिः सन्ध्याकाले च बलिष्ठाः भवन्ति। **{अत्र सर्वे जलचरराशयः कीटराशित्वेन परिगण्यन्ते}**

**मेषादीनां राशीनां प्रमाणनिर्णयः**

**पूर्वार्धे विषयादयः कृतगुणा मानं प्रतीपं च तत्**

विषयादयः= ५ आदयः अङ्काः-५-६-७-८-९-१० इति संख्याः, कृतगुणाः=चतुर्भिः गुणिताः, राशिचक्रस्य पूर्वार्धस्य प्रमाणं भवति। (मेषादयः ६ राशयः राशिचक्रस्य पूर्वार्धम्, तुलादयः ६ राशयः राशिचक्रस्य उत्तरार्धम्) ५×४=२० मेषस्य मानम्। ६×४=२४ वृषस्य मानम्। ७×४=२८ मिथुनस्य मानम्। ८×४=३२ कर्कस्य मानम्। ९×४=३६ सिंहस्य मानम्। १०×४=४० कन्यायाः मानम्। तदेव प्रतीपम्=एतानि एव मानानि विलोमतया तुलादीनां मानानि भवन्ति, यथा-

| | राशिः | मानम् | राशिः | |
|---|---|---|---|---|
| ह्रस्वः | मेषः | २० | मीनः | ह्रस्वः |
| | वृषः | २४ | कुम्भः | |
| समः | मिथुनम् | २८ | मकरः | समः |
| | कर्कः | ३२ | धनुः | |
| दीर्घः | सिंहः | ३६ | वृश्चिकः | दीर्घः |
| | कन्या | ४० | तुला | |

राशीनां ह्रस्व-सम-दीर्घत्वचिन्तने अस्य उपयोगः भवति।

**दुश्चिक्यं सहजं तपश्च नवमं त्र्याद्यं त्रिकोणं च तत् -**

**तृतीयभावः** - दुश्चिक्यम्, सहजं चेति तृतीयभावस्य संज्ञाविशेषौ।

**नवमभावः** - तपः, त्रित्रिकोणं चेति नवमभावस्य संज्ञाविशेषौ।

राशीनां वर्णाः –

रक्तश्श्वेतश्शुकतनुनिभः पाटलो धूम्रपाण्डु-

श्चित्रः कृष्णः कनकसदृशः पिङ्गलः कर्बुरश्च।

बभ्रुः स्वच्छः प्रथमभवनाद्येषु वर्णाः प्लवत्वं

स्वाम्याशाख्यं दिनकरयुताद्भाद्द्वितीयं च वेशिः॥ २०॥

| **राशयः** | मेषः | वृषः | मिथुनम् | कर्कः | सिंहः | कन्या | तुला | वृश्चिकः | धनुः | मकरः | कुम्भः | मीनः |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| **वर्णाः** | रक्तः | श्वेतः | हरितः | पाटलः | पाण्डुरः | चित्रः | कृष्णः | पीतः | पिङ्गलः | कर्बुरः | धूम्रः | स्वच्छः |

**प्लवत्वविचारः –**

स्वाम्याशाख्यं प्लवत्वम् = स्वामिनः- राश्यधिपतेः, या आशा-दिक्, तस्यां दिशि तत्तद्राशयः प्लवत्वं=नीचगमनत्वं, प्राप्नुवन्ति। राश्यधिपानाः ग्रहाणां दिशः द्वितीये अध्याये वक्ष्यन्ते। अतः मेषादयः राशयः स्वाधिपतिदिग्दिशि प्लवसंज्ञकाः भवन्ति।

**वेशिस्थानम् –**

रविस्थितराशितः द्वितीयस्थानं **वेशिः** इत्युच्यते। रविः मेषराशौ भवति चेत् वृषभराशिः वेशिस्थानं भवति। कुम्भराशौ रविः भवति चेत् मीनराशिः वेशिस्थानं भवति।

# द्वितीयः अध्यायः – ग्रहयोनिप्रभेदाध्यायः

**रव्यादीनां कारकत्वम् -**

कालात्मा दिनकृन्मनस्तुहिनगुस्सत्वं कुजो ज्ञो वचो
जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः।
राजानौ रविशीतगूक्षितिसुतो नेता कुमारो बुधः
सूरिर्दानवपूजितश्च सचिवौ प्रेष्यस्सहस्रांशुजः॥१॥

अस्मिन् श्लोके ग्रहाणाम् आत्मादिकारकत्वं राजादिकारकत्वं च उच्यते, यथा –

| ग्रहः | आत्मादिकारकत्वम् | राजादिकारकत्वम् |
|---|---|---|
| रविः | आत्मा | राजा |
| चन्द्रः | मनः | राज्ञी |
| कुजः | सत्त्वम् | सेनानी |
| बुधः | वाक् | राजकुमारः |
| गुरुः | ज्ञानं सुखं च | मन्त्री |
| शुक्रः | कामः | मन्त्री |
| शनिः | दुःखम् | सेवकः |

**ग्रहाणां पर्यायनामानि –**

हेलिस्सूर्यश्चन्द्रमाश्शीतरश्मिर्हेम्ना विज्ञो बोधनश्चेन्दुपुत्रः।
आरो वक्रः क्रूरदृक्चावनेयः कोणो मन्दस्सूर्यपुत्रोऽसितश्च॥२॥
जीवोऽङ्गिरास्सुरगुरुर्वचसांपतीज्य-
श्शुक्रो भृगुर्भृगुसुतस्सित आस्फुजिच्च।
राहुस्तमोऽगुरसुरश्च शिखीति केतुः
पर्यायमन्यदुपलभ्य वदेच्च लोकात्॥३॥

| ग्रहः | पर्यायनामानि |
|---|---|
| रविः | हेलिः, सूर्यः |
| चन्द्रः | चन्द्रमाः, शीतरश्मिः |
| कुजः | आरः, वक्रः, क्रूरदृक्, आवनेयः |
| बुधः | हेम्ना, वित्, ज्ञः, बोधनः, इन्दुपुत्रः |
| गुरुः | जीवः, अङ्गिराः, सुरगुरुः, वचसांपतिः, इज्यः |
| शुक्रः | भृगुः, भृगुसुतः सितः, आस्फुजित् |
| शनिः | कोणः, मन्दः, सूर्यपुत्रः, असितः |
| राहुः | तमः, अगुः, असुरः |
| केतुः | शिखी |

अन्यानि अपि पर्यायनामानि यानि भवन्ति तानि लोकात्=लोकव्यवहारतः ज्ञेयानि। यथा –

रवेः - दिनकरः, सप्ताश्वः, गभस्तिः, भास्करः, प्रभाकरः, ब्रध्नः, इनः, मार्तण्डः, चण्डांशुः, कमलबन्धुः ....... इत्यादीनि नामानि ।

चन्द्रस्य - निशाकरः, तुहिनकिरणः, तुहिनरश्मिः, शीतांशुः, हिमांशुः, शीतगुः, ताराधीशः, कुमुदिनीपतिः ..... इत्यादीनि नामानि ।

कुजस्य - भूमिपुत्रः, अङ्गारकः, महीजः, क्रूरनेत्रः, क्ष्माजः, भूजः .... इत्यादीनि नामानि ।

बुधस्य - चन्द्रसूनुः, निशाकरतनयः, चन्द्रपुत्रः, शशितनयः ....... इत्यादीनि नामानि ।

गुरोः - बृहस्पतिः, वाचस्पतिः, देवगुरुः, वाक्पतिः, देवमन्त्री, इत्यादीनि नामानि ।

शुक्रस्य - असुरगुरुः, दैत्यमन्त्री, उशनाः, भार्गवः, कविः ...... इत्यादीनि नामानि ।

शनेः - मन्दगः, रविपुत्रः, सूर्यसूनुः, सौरिः, अलसः .... इत्यादीनि नामानि ।

राहोः - सर्पः, ग्रहणकारकः, सूर्यग्राही, छायाग्रहः, ......इत्यादीनि नामानि ।

केतोः - पुच्छः, राहुच्छाया, छायाग्रहः, ...... इत्यादीनि नामानि ।

**रव्यादीनां वर्णाः –**

रक्तश्यामो भास्करो गौर इन्दुर्नात्युच्चाङ्गो रक्तगौरश्च वक्रः।

दूर्वाश्यामो ज्ञो गुरुर्गौरगात्रः श्यामश्शुक्रो भास्करिः कृष्णदेहः॥४॥

| ग्रहः | वर्णः |
|---|---|
| रविः | रक्तमिश्रितकृष्णवर्णः (अतिरक्तवर्णः) |
| चन्द्रः | गौरवर्णः-श्वेतवर्णः |
| कुजः | श्वेतमिश्रितरक्तवर्णः (श्वेतरक्तवर्णः) |
| बुधः | दूर्वा इव श्यामः – हरितवर्णः |
| गुरुः | गौरवर्णः -श्वेतवर्णः |
| शुक्रः | श्यामवर्णः-श्वेतमिश्रितकृष्णवर्णः |
| शनिः | कृष्णवर्णः-असितवर्णः |

**रव्यादीनां ग्रहाणां वर्णविशेषादयः -**

वर्णास्ताम्रसितातिरक्तहरितव्यापीतचित्रासिता


वह्न्यम्ब्वग्निजकेशवेन्द्रशचिकास्सूर्यादिनाथाः क्रमात्।

प्रागाद्या रविशुक्रलोहिततमस्सौरेन्दुवित्सूरयः

क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः॥ ५॥

| ग्रहः | वर्णः | देवता |
|---|---|---|
| रविः | ताम्रः | अग्निः |
| चन्द्रः | श्वेतः | जलम् |
| कुजः | अतिरक्तः | कार्तिकेयः |
| बुधः | हरितः | विष्णुः |
| गुरुः | पीतः | इन्द्रः |
| शुक्रः | चित्रः | इन्द्राणी |
| शनिः | कृष्णः | प्रजापतिः |

ग्रहाणां दिशः –




**पापग्रहाः शुभग्रहाश्च –**

क्षीणचन्द्रः, रविः, कुजः, शनिः एते पापग्रहाः, एतैः युतः बुधः अपि पापः भवति। अन्ये शुभाः । अर्थात् रविकुजशनयः सर्वदा पापाः, चन्द्रः यदा क्षीणो भवति तदा पापः भवति, एतैः पापग्रहैः युतः बुधः अपि पापः भवति, अक्षीणचन्द्रः शुभः, बुधः गुरुश्च सर्वदा शुभौ भवतः इति।


**ग्रहाणां पुंस्त्रीविभागः पञ्चभूताधिपत्यं च –**

बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः ।
शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण ॥ ६ ॥

ग्रहेषु बुधः शनिश्च नपुंसकौ, चन्द्रः शुक्रः च स्त्रियौ, रविः कुजः गुरुः च पुरुषाः।

| पुरुषाः | स्त्रियौ | नपुंसकौ |
|---|---|---|
| • रविः<br>• कुजः<br>• गुरुः | • चन्द्रः<br>• शुक्रः | • बुधः<br>• शनिः |

कुजादयः ताराग्रहाः क्रमेण अग्नि-भूमि-आकाश-जल-वायुभूतानाम् अधिपाः भवन्ति। **वह्न्यम्बु**-इत्यस्मिन् श्लोके देवताकथनावसरे रवेः अग्निः, चन्द्रस्य जलं च देवता इत्युक्तत्वात् रवेः अग्निभूताधिपत्वं चन्द्रस्य जलभूताधिपत्वं च सिद्ध्यति।





**ग्रहाणां ब्राह्मणादिवर्णाधिपत्वं सत्त्वादिकारकत्वं च –**

विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोऽन्तराणाम्।

चन्द्रार्कजीवा ज्ञसितौ कुजार्की यथाक्रमं सत्त्वरजस्तमांसि॥ ७ ॥

ग्रहेषु गुरुशुक्रौ ब्राह्मणकारकौ, रविकुजौ क्षत्रियकारकौ, चन्द्रः वैश्यकारकः, बुधः शूद्रकारकः, शनिः सङ्करवर्णानां च कारकः भवति। रवि-चन्द्र-गुरवः सत्वगुणस्य, बुधशुक्रौ रजोगुणस्य, कुजशनी तमोगुणस्य च कारकाः भवन्ति। यथा –



**ग्रहाणां स्वरूपम् –**

| | | | |
|---|---|---|---|
| मधुपिङ्गलदृक्चतुरश्रतनुः<br>पित्तप्रकृतिस्सविताल्पकचः।<br>तनुवृत्ततनुर्बहुवातकफः<br>प्राज्ञश्च शशी मृदुवाक् शुभदृक्॥८॥ | क्रूरदृक्तरुणमूर्तिरुदारः<br>पैत्तिकस्सुचपलः कृशमध्यः।<br>श्लिष्टवाक्सततहास्यरुचिर्ज्ञः<br>पित्तमारुतकफप्रकृतिश्च॥९॥ | बृहत्तनुः पिङ्गलमूर्धजेक्षणो<br>बृहस्पतिः श्रेष्ठमतिः कफात्मकः।<br>भृगुस्सुखी कान्तवपुस्सुलोचनः<br>कफानिलात्माऽसितवक्रमूर्धजः॥१० | मन्दोऽलसः कपिलदृक्कृशदीर्घगात्रः<br>स्थूलद्विजः परुशरोमकचोऽनिलात्मा। |

रविः - मधुनः वर्णः यथा भवति तथा पिङ्गलवर्णकनेत्रयुक्तः, चतुरश्राकारकशरीरः (दैर्घ्यं स्थौल्यं च अपेक्षितप्रमाणेन भवति इत्यर्थः), पित्तप्रकृतिमान्, स्वल्परोमवान् च भवति।

चन्द्रः - सुन्दरशरीरवान् (समशरीरः-नातिस्थूलः नातिकृशः च इत्यर्थः), वातकफमिश्रप्रकृतिकः, मृदुवचनः, सुन्दरनेत्रयुक्तः, बुद्धिमान् च भवति।

कुजः - क्रूरनेत्रः (दर्शनमात्रेण भीतिजनकः), युवकः (अधिकवयस्कोऽपि शरीराकारेण युवकः इव प्रतिभाति), दानशीलः, पित्तप्रकृतिकः, चञ्चलस्वभाववान्, शरीरस्य मध्यभागे-कटिभागे अधिकतया कृशः च भवति।

बुधः - द्व्यर्थवचनः, सर्वदा हास्यकरः, वातपित्तकफमिश्रप्रकृतिकश्च भवति।

गुरुः - स्थूलदेही, पिङ्गलवर्णयुक्तकेशान्वितः, पिङ्गलवर्णकनेत्रयुक्तः, बुद्धिमान्, कफप्रकृतिकश्च भवति।

शुक्रः - सर्वदा सुखाभिलाशी, सुन्दरशरीरः, सुन्दरनेत्रः, कफवातमिश्रप्रकृतिः, अतिकृष्णवर्णकैः वक्रीभूतैः केशैः युक्तश्च भवति।

शनिः - आलस्ययुतः, कपिलवर्णकनेत्रयुतः, कृशदेही, दीर्घशरीरः, स्थूलैः दन्तैः युतः, परुषैः रोमभिः परुषैः केशैः च युतः, वातप्रकृतिकश्च भवति।

**ग्रहाणां स्न्याय्वादिकारकत्वम् –**

स्नाय्वस्थ्यसृक्त्वगथ शुक्रवसे च मज्जा
मन्दार्कचन्द्रबुधशुक्रसुरेड्यभौमाः ॥११॥

अस्माकं शरीरे सप्त धातवः भवन्ति। ते यथा – स्नायु (वायुवाहकनाडीविशेषः), अस्थि, असृक् (रक्तम्), त्वक् (चर्म), शुक्रम् (रेतः,वीर्यम्), वसा(मेदः), मज्जा (अस्थ्यन्तर्गतः द्रव्यविशेषः) चेति। एतेषा धातूनां रव्यादयः ग्रहाः कारकाः भवन्ति, यथा –

| ग्रहाः | धातवः |
|---|---|
| रविः | अस्थि |
| चन्द्रः | रक्तम् |
| कुजः | मज्जा |
| बुधः | चर्म |
| गुरुः | वसा |
| शुक्रः | शुक्रम् |
| शनिः | स्नायु |

# वियोनिजन्माध्यायः

विविधाः योनयः वियोनयः। योनिः= जन्मस्थानम्। वयं जीवाः वृक्ष-पशु-पक्षि-क्रिमि-कीट-प्राणि-मनुष्यप्रभृतिषु ८४ लक्षपरिमितेषु योनिषु जन्म प्राप्नुमः। तत्र मनुष्याणां जन्मकालवशात् शुभाशुभचिन्तनक्रमः चतुर्थादिषु अध्यायेषु कृतः विद्यते। परन्तु प्राणिनां पक्षिणां वृक्षाणां च जन्म कस्यां ग्रहस्थित्यां सम्भवति? विशेषतया अस्माभिः तेषां जन्मचिन्तनं कथं कर्तव्यम्? इत्यादिविषयम् आचार्यः तृतीये अस्मिन् अध्याये कथयति, यथा –


**क्रूरग्रहैः.......... (१)**

यस्मिन् काले क्रूरग्रहाः बलिष्ठाः भवन्ति, शुभग्रहाः बलहीनाः भवन्ति, नपुंसकग्रहः लग्नात् केन्द्रभावे भवति अथवा केन्द्रभावं पश्यति तदा चन्द्रः वियोनिसंज्ञकराशेः द्वादशांशे यदि स्यात् तर्हि वियोनेः जन्म सम्भवति इति वक्तव्यम् ।

एवम् अस्मिन् श्लोके वियोनिजन्मनः चत्वारः नियमाः प्रोक्ताः सन्ति। एते ४ नियमाः भवन्ति चेद् एव वियोनिजन्म भवति इत्यर्थः। ते यथा –

१. पापग्रहाः बलिष्ठाः भवेतुः
२. शुभग्रहाः बलहीनाः भवेयुः
३. नपुंसकग्रहः(शनिः/बुधः) लग्नात् केन्द्रभावे भवेत् अथवा केन्द्रभावे नपुंसकस्य दृष्टिः भवेत्
४. चन्द्रः वियोनिसंज्ञकराशेः द्वादशांशे भवेत्

तत्र विशेषः – पूर्वेषु चतुर्षु नियमेषु त्रयः नियमाः यदि अवश्यं भवन्ति तर्हि चतुर्थनियमानुसारं वियोनिजन्म भवति इति चिन्तनीयम्।



वियोनिसंज्ञकराशयः – मेषः, वृषः, कर्कः, सिंहः, वृश्चिकः, धनुषः उत्तरार्धम्, मकरः, मीनः च।

यदि केवलं लक्षणत्रयमेव भवति चतुर्थं लक्षणं न भवति [अर्थात् पापाः बलिष्ठाः, शुभाः बलहीनाः, नपुंसकस्य केन्द्रे स्थितिः वा दृष्टिः चेति त्रीणि लक्षणानि भवन्ति परन्तु चन्द्रः प्राणिसंज्ञकस्य राशेः द्वादशांशे यदि नास्ति (अर्थात् चन्द्रः मिथुनराशेः, कन्याराशेः, तुलाराशेः, धनुःपूर्वार्धस्य, कुम्भराशेः वा द्वादशांशे यदि स्यात्)] तर्हि प्राणिजन्म न भवति इति वक्तव्यम्।

**पापा बलिनः .......... (२)**

बलिष्ठाः पापग्रहाः स्वनवांशे, बलहीनाः शुभग्रहाः परनवांशे, लग्नं वियोनिसंज्ञकराशौ च यदि स्यात् तर्हि वियोनीनां जन्म भवति इति वक्तव्यम् ।

एवम् अस्मिन् श्लोके वियोनिजन्मनः त्रयः नियमाः प्रोक्ताः सन्ति। एते ३ नियमाः भवन्ति चेद् एव वियोनिजन्म भवति इत्यर्थः। ते यथा –

१. पापग्रहाः बलिष्ठाः स्वनवांशे भवेतुः
२. शुभग्रहाः बलहीनाः परनवांशे भवेयुः
३. जन्मलग्नं प्राणिसंज्ञकराशौ भवेत्

**<u>प्राणिनां शरीरे मेषादिराशीनाम् अङ्गविभागः -</u>**

**क्रियः शिरो वक्त्रगलम्  .......... (३)**

| **राशयः** | **अङ्गानि** |
|---|---|
| मेषः | शिरः |
| वृषः | मुखं कण्ठः च |
| मिथुनं | पूर्वपादौ भुजः च |
| कर्कः | पृष्ठभागः |
| सिंहः | हृदयं |
| कन्या | पार्श्वभागौ |
| तुला | उदरं |
| वृश्चिकः | अपानदेशः |
| धनुः | पश्चात्पादौ |
| मकरः | गुह्यभागः |
| कुम्भः | कट्यधःपृष्ठभागः |
| मीनः | पुच्छं |

**<u>वियोनौ वर्णज्ञानम् -</u>**

**लग्नांशकात् .......... (४)**

वियोनिजन्मलग्नं यद् वर्तते तस्य नवांशराशिः यः वर्तते तद्राशेः वर्णः, लग्ने यः ग्रहः वर्तते तस्य ग्रहस्य वर्णः, लग्नं यः ग्रहः पश्यन् अस्ति तस्य ग्रहस्य वर्णः वा बलाबलवशात् वियोनौ वक्तव्यः। (अर्थात् लग्ने यदि कोऽपि ग्रहः भवति तर्हि तस्य ग्रहस्य वर्णः वक्तव्यः। यदि लग्ने कोऽपि नास्ति तर्हि लग्नं यदि कोऽपि ग्रहः पश्यन् अस्ति तर्हि तस्य ग्रहस्य वर्णः वक्तव्यः। यदि लग्ने यः कोऽपि ग्रहः नास्ति, लग्नम् अपि कोऽपि ग्रहः न पश्यति तर्हि लग्ननवांशराशिः यः वर्तते तस्य राशेः वर्णः वक्तव्यः इति ज्ञातव्यम्)

यदि लग्ने बहवः ग्रहाः भवन्ति अथवा लग्नं बहवः ग्रहाः पश्यन्ति तर्हि बहून् वर्णान् (तत्तद्ग्रहसम्बद्धान् वर्णान्) वदेत् ।

यदि वियोनिजन्मलग्नात् सप्तमभावे कोऽपि ग्रहः भवति तर्हि तस्य वियोनेः पृष्ठभागे काचित् रेखा विद्यते इति वक्तव्यम्।

**<u>पक्षिजन्म</u>**

**खगे दृगाणे .......... (५)**

अस्मिन् श्लोके पक्षिजन्मनः त्रयः योगाः प्रोक्ताः सन्ति। ते यथा –

१. पक्षिद्रेष्काणे लग्ने बलसंयुतेन ग्रहेण युक्ते
२. चरभांशकोदये बलसंयुतेन ग्रहेण युक्ते
३. बुधांशके बलसंयुतेन ग्रहेण युक्ते

} लग्नोपरि शनेः चन्द्रस्य वा दृष्टिसद्भावे/ लग्ने शनेः चन्द्रस्य वा युतिसद्भावे

पक्षिद्रेष्काणाः - मिथुनराशेः २ द्रेष्काणः, सिंहराशेः १ द्रेष्काणः, तुलाराशेः २ द्रेष्काणः, कुम्भराशेः १ द्रेष्काणः च ।

पूर्वोक्तानां त्रयाणां योगानां सम्भवः यथा -

**१)** तत्र लग्नं पक्षिद्रेष्काणे, तस्मिन् लग्ने बलिष्ठः ग्रहः च यदि स्यात् तर्हि तादृशे लग्ने शनेः योगः अथवा दृष्टिः भवति तर्हि स्थलजानां पक्षिणां जन्म इति वक्तव्यम्; तादृशे लग्ने चन्द्रस्य योगः अथवा दृष्टिः भवति तर्हि जलचरपक्षिणां जन्म इति वक्तव्यम्।

**२)** तत्र लग्नं चरराशौ (चरराशिनवांशे वा), तस्मिन् लग्ने बलिष्ठः ग्रहः च यदि स्यात् तर्हि तादृशे लग्ने शनेः योगः अथवा दृष्टिः भवति तर्हि स्थलजानां पक्षिणां जन्म इति वक्तव्यम् ; तादृशे लग्ने चन्द्रस्य योगः अथवा दृष्टिः भवति तर्हि जलचरपक्षिणां जन्म इति वक्तव्यम्।

३) तत्र लग्नं बुधस्य नवांशे (लग्ननवांशाधिपतिः बुधः भवति चेत्), तस्मिन् लग्ने बलिष्ठः ग्रहः च यदि स्यात् तर्हि तादृशे लग्ने शनेः योगः अथवा दृष्टिः भवति तर्हि स्थलजानां पक्षिणां जन्म इति वक्तव्यम् ; तादृशे लग्ने चन्द्रस्य योगः अथवा दृष्टिः भवति तर्हि जलचरपक्षिणां जन्म इति वक्तव्यम्।

**<u>वृक्षजन्म -</u>**

**होरेन्दुसूरिरविभिः .......... (६)**

यस्मिन् काले लग्न-चन्द्र-गुरु-रवयः बलहीनाः यदि भवन्ति तदा वृक्षाणां जन्म भवति।

तत्र लग्नस्य नवांशराशिः जलराशौ चेत् (कर्क-मकरपश्चार्ध-मीनाः जलराशयः) जलसमीपस्थवृक्षाणां जन्म इति, लग्नस्य नवांशराशिः जलभिन्नराशौ चेत् (मेष-वृष-मिथुन-सिंह-कन्या-तुला-वृश्चिक-धनु-मकरपूर्वार्ध-कुम्भाः स्थलराशयः) स्थलवृक्षाणां जन्म चेति वक्तव्यम्।

वृक्षसंख्याज्ञानं यथा –

लग्नात् लग्ननवांशाधिपतिः ग्रहः यतमे राशौ भवति तावत्संख्याकानां वृक्षाणां जन्म इति वक्तव्यम्। उदाहरणार्थम् – मेषराशिः लग्नं, लग्ननवांशाधिपः रविः, सः रविः कन्याराशौ वर्तते इति चिन्तयामः, तदा – मेषलग्नात् लग्ननवांशाधिपः रविः षष्ठे राशौ वर्तते इत्यतः ६ वृक्षाणां जन्म अभवत् इति चिन्तनीयम्।

**<u>ग्रहाणां वृक्षकारकत्वम् -</u>**

**अन्तःसारान् जनयति रविः ..... (७)**

रविः अन्तःसारान् वृक्षान् जनयति। सूर्यसूनुः दुर्भगान् वृक्षान् जनयति। चन्द्रः क्षीरोपेतान् वृक्षान् जनयति। भौमः कण्टकाढ्यान् वृक्षान् जनयति। वागीशज्ञौ सफलविफलान् वृक्षान् जनयतः। शुक्रः पुष्पवृक्षान् जनयति। भूयः चन्द्रः स्निग्धान् वृक्षान् जनयति। भूयः भौमः कटुकविटपान् जनयति।

अन्तस्सारवृक्षाः = अन्तर्भागे सारयुताः वृक्षाः। ये वृक्षाः गृहनिर्माणार्थं (गृहे द्वार-छद-आसन्द-मञ्चादिनिर्माणार्थम्) उपयुज्यन्ते तादृशाः वृक्षाः अन्तस्सारवृक्षाः इत्युच्यन्ते । (Teak wood)

दुर्भगाः वृक्षाः = दुर्गन्धयुताः/ द्रष्टुम् असमीचीनाः वृक्षाः (शुष्काः वृक्षाः)

क्षीरिणः वृक्षाः = येषां वृक्षाणां त्वक्-भागं पत्रं वा निष्कासयामः चेत् क्षीरवत् श्वेतवर्णयुक्तं जलं निस्सरति ते वृक्षाः क्षीरवृक्षाः इत्युच्यन्ते। (अश्वत्थः, वटः, प्लक्षः etc,.)

कण्टकवृक्षाः = कण्टकैः संयुताः वृक्षाः (शमी, बिल्वः, केतकी etc,.)

सफलवृक्षाः = फलसहिताः वृक्षाः - फलप्रधानाः वृक्षाः (आम्रः, पनसः, दाडिमः, द्राक्षालता, अञ्जूरः etc,.)

विफलवृक्षाः = फलरहिताः वृक्षाः – फलहीनाः वृक्षाः (देवदारु-निम्बः etc,. )

पुष्पवृक्षाः = पुष्पैः युताः – पुष्पप्रधानाः वृक्षाः (चम्पकः, मल्लिका, पुन्नागः, करवीरः etc,.)

स्निग्धाः वृक्षाः = मसृणाः (soft) वृक्षाः लताः वा (कदलीसस्यं, अलङ्कारार्थम् आरोप्यमाणाः लताविशेषाः etc,.)

कटुकवृक्षाः = कटुरसयुक्ताः वृक्षाः, औषधिनिमित्तम् उपयुज्यमानाः वृक्षाः (जातीपत्रं-लवङ्गः-एलासस्यं-कृष्णमरीचिका etc,.)

| ग्रहः | वृक्षभेदाः |
|---|---|
| रविः | अन्तस्साराः |
| चन्द्रः | क्षीरिणः स्निग्धाः च |
| कुजः | कण्टकयुताः कटुकाः च |
| बुधः | विफलाः |
| गुरुः | सफलाः |
| शुक्रः | पुष्पिणः |
| शनिः | दुर्भगाः |

**शुभोऽशुभर्क्षे .............. (८)**

शुभः अशुभर्क्षे चेत् कुभूमिजं रुचिरं वृक्षं करोति, अन्यथा विपरीतम् (अर्थात् अशुभः शुभक्षेत्रे चेत् सुभूमियम् असमीचीनं वृक्षम्) करोति इति वक्तव्यम्। [एवमेव शुभः शुभक्षेत्रे चेत् समीचीनः वृक्षः समीचीनभूमौ वर्तते इति, अशुभः अशुभक्षेत्रे भवति चेत् असमीचीनः वृक्षः असमीचीनभूमौ वर्तते इत्यपि वक्तव्यम्]


ग्रहः स्वकात् यावति परांशके विच्युतः तथाविधाः तुल्याः तरवः भवन्ति इति वक्तव्यम्।


**श्लोकस्य पूर्वार्धस्य विश्लेषणम् एवं वर्तते –**


अत्र राशिः इति पदेन भूमिः स्वीक्रियते, राशौ स्थितः ग्रहः भूमौ विद्यमानः वृक्षः इति च स्वीक्रियते। अतः राशिग्रहाभ्यां भूमिवृक्षयोः चिन्तनक्रमः प्रतिपादितः वर्तते। तद्यथा - शुभग्रहः अशुभग्रहराशौ यदि भवति तर्हि सुन्दरः=समीचीनः वृक्षः कुत्सितभूमौ= असमीचीनभूमौ वर्तते इति वक्तव्यम्। तथैव अशुभग्रहः शुभग्रहराशौ यदि भवति तर्हि असमीचीनः वृक्षः समीचीनभूमौ वर्तते इति चिन्तनीयम्। अनेनैव क्रमेण यदि अशुभग्रहः

अशुभराशौ भवति तर्हि असमीचीनः वृक्षः असमीचीनभूमौ, शुभग्रहः शुभग्रहराशौ च यदि भवति तर्हि समीचीनः वृक्षः समीचीनभूमौ वर्तते इत्यपि चिन्तनीयम् ।

उदाहरणार्थम् –







अत्र क्रमेण चत्वारि उदाहरणानि दत्तानि ।

**श्लोकस्य उत्तरार्धस्य विश्लेषणम् एवं वर्तते –**

पूर्वं ६ श्लोके वृक्षजन्म कथं भवति इति प्रतिपादितं वर्तते, तदनु तस्मिन्नेव श्लोके वृक्षसंख्याज्ञानक्रमः अपि प्रोक्तः। तदनन्तरं ७ श्लोके रव्यादयः ग्रहाः केषां केषां वृक्षाणां कारकाः इति प्रोक्तं वर्तते, ततः परं ८ श्लोकस्य पूर्वार्धे कस्यां भूमौ कीदृशः वृक्षः उत्पन्नः इति कथं ज्ञातव्यम् इति क्रमः उक्तः, सम्प्रति उत्तरार्धे समानजातीयाः वृक्षाः कियत्संख्याकाः भवन्ति इति ज्ञानप्रकारः उच्यते। तद्यथा –

स्थलजलर्क्षाधिपः ग्रहः स्वराशिनवांशात् यतमे परराशिनवांशे वर्तते तावत्संख्याकाः समानजातीयाः वृक्षाः भवन्ति इति वक्तव्यम्। अर्थात् – वृक्षजन्मलग्नं मेषराशौ इति चिन्तयामः। लग्ननवांशाधिपः चन्द्रः सः धनूराशौ वर्तते इति कल्पयामः। तर्हि तस्य चन्द्रस्य आत्मीयनवांशः कर्कराशिनवांशः, सः कर्कराशितः धनूराशिनवांशे विच्युतः=गतः इत्यतः कर्कात् धनुःपर्यन्तं गणयामः चेत् ६ लभ्यते अतः समानजातीयाः ६ वृक्षाः उत्पन्नाः सन्ति इति चिन्तनीयम्। **[ ६ श्लोकस्य उत्तरार्धानुसारं मेषलग्नात् लग्ननवांशाधिपः ग्रहः चन्द्रः नवमे (धनूराशौ) वर्तते इत्यतः आहत्य ९ वृक्षाः समुत्पन्नाः तेषु वृक्षेषु ६ वृक्षाः एकजातीयाः सन्ति इति चिन्तनीयम् ]**

गर्भिण्याः मरणयोगाः -

**अशुभद्वयमध्यसंस्थितौ लग्नेन्दू न च सौम्यवीक्षितौ।**
**युगपत् पृथगेव वा भवेन्नारी गर्भयुता विपद्यते॥**

अस्य उदाहरणानि यथा -

युगपत् -

| | | | |
|---|---|---|---|
| श | ल च | कु | |
| | | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| | ल च कु श | | |
| | | | |
| | | | |
| | | | |

→ अत्र श-$0^s$-$08^o$-15'

ल-$0^s$-$10^o$-15'

च-$0^s$-$12^o$-15'

कु-$0^s$-$15^o$-15'

**पृथक् -**

| | | | |
|---|---|---|---|
| श | ल | च | कु |
| | | | |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| श | ल | कु | च |
| | | | र |
| | | | |
| | | | |

| | | | |
|---|---|---|---|
| श | ल | कु | |
| च | | | |
| र | | | |
| | | | |

| | | | |
|---|---|---|---|
| श | ल | कु | |
| | | | |
| | | | |
| र बु | च | राहुः | |

# द्रेष्काणवशात् अङ्गविभागः ततः तिलव्रणादिज्ञानक्रमश्च

**कंदृक्च्छ्रोत्रनसाकपोलहनवः वक्त्रं च होरादयः**

**ते कण्ठांसकबाहुपार्श्वहृदयक्रोडानि नाभिस्ततः।**

**वस्तिः शिश्नगुदे ततश्च वृषणावूरू ततो जानुनी**

**जङ्घेऽङ्घ्रीत्युभयत्र वाममुदितैर्द्रेष्काणभागैस्त्रिधा॥**

कंदृक्च्छ्रोत्रनसाकपोलहनवः वक्त्रं, कण्ठांसकबाहुपार्श्वहृदयक्रोडानि नाभिः, ततः वस्तिः शिश्नगुदे ततश्च वृषणावूरू ततो जानुनी जङ्घे अङ्घ्री चेति त्रिधा द्रेष्काणभागैः होरादयः उभयत्र उदितैः वामम् (अनुदितैः दक्षिणम्) इति न्यायेन चिन्त्याः।

अत्र त्रयः अङ्गविभागाः प्रोच्यन्ते। लग्नं प्रथमद्रेष्काणे चेत् प्रथमः अङ्गविभागः, द्वितीयद्रेष्काणे चेत् द्वितीयः अङ्गविभागः, तृतीयद्रेष्काणे चेत् तृतीयः अङ्गविभागः इत्यर्थः। यथा-

प्रथमद्रेष्काणे – कं दृक् श्रोत्रं नसा कपोलः हनुः वक्त्रं चेति ।

द्वितीयद्रेष्काणे – कण्ठः अंसकः बाहुः पार्श्वः हृदयं क्रोडः नाभिः चेति ।

तृतीयद्रेष्काणे - वस्तिः शिश्नगुदे वृषणौ ऊरू जानुनी जङ्घे अङ्घ्री चेति ।


एवं प्रत्येकमपि द्रेष्काणे सप्त सप्त अङ्गानि प्रोक्तानि।

तत्र उदितराशिभिः शरीरस्य वामभागः चिन्तनीयः, अनुदितराशिभिः शरीरस्य दक्षिणभागः चिन्तनीयः इति क्रमः।

**उदितराशयः इत्युक्ते - लग्नराशेः भुक्तांशाः द्वादश-एकादश-दशम-नवम-अष्टमभावाः सप्तमे लग्नतुल्यभागाः च।**

**अनुदितराशयः इत्युक्ते - लग्नभोग्यांशाः द्वितीय-तृतीय-चतुर्थ-पञ्चम-षष्ठभावाः सप्तमे लग्नतुल्यभागाः च।**


यथा -




A= लग्नभावमध्यम्, AC=लग्नभुक्तांशाः,

AB=लग्नभोग्यांशाः, E=सप्तमभावमध्यम्,

ED= सप्तमभोग्यांशाः, EF=सप्तमभुक्तांशाः




सम्प्रति उदाहरणेन पश्यामः – मिथुनराशिः लग्नमिति चिन्तयामः, तत्र प्रथमद्रेष्काणे यदि लग्नं तर्हि “कंदृगित्यादिः” अङ्गविभागः, स यथा -

| | | | |
|---|---|---|---|
| वामनसा | वामश्रोत्रं | वामनेत्रं | **शिरः** |
| वामकपोलः | | | दक्षिणनेत्रं |
| वामहनुः | | | दक्षिणश्रोत्रं |
| **मुखं** | दक्षिणहनुः | दक्षिणकपोलः | दक्षिणनसा |

लग्नं यदि मिथुनराशौ द्वितीयद्रेष्काणे भवति तर्हि “कण्ठादिः” अङ्गविभागः, स यथा -

| | | | |
|---|---|---|---|
| वामपार्श्वं | वामबाहुः | वामभुजः | **कण्ठः** |
| वामहृदयं | | | दक्षिणभुजः |
| वामोदरं | | | दक्षिणबाहुः |
| **नाभिः** | दक्षिणोदरं | दक्षिणहृदयं | दक्षिणपार्श्वं |

लग्नं यदि मिथुनराशौ तृतीयद्रेष्काणे भवति तर्हि “वस्त्यादिः” अङ्गविभागः, स यथा -

| | | | |
|---|---|---|---|
| वामोरुः | वामाण्ड-कोशः | वामगुह्यं | **वस्तिः** |
| वामजानु | | | दक्षिणगुह्यं |
| वामजङ्घा | | | दक्षिणाण्ड-कोशः |
| **पादौ** | दक्षिणजङ्घा | दक्षिणजानु | दक्षिणोरुः |

## अरिष्टयोगः

**लग्ने क्षीणे शशिनि ………………. शक्तिमद्भिः॥७॥**

लग्नभावे क्षीणचन्द्रः, लग्नात् केन्द्रभावेषु अष्टमभावे च पापग्रहाः यदि भवन्ति तर्हि अरिष्टयोगात् शिशोः मरणं सम्भवति।

लग्नात् चतुर्थे सप्तमे अष्टमे वा पापद्वयमध्यस्थः चन्द्रः भवति चेत् अरिष्टयोगेन शिशुमरणं भवति।

लग्नं पापद्वयमध्यस्थं, लग्नात् सप्तमाष्टमयोः पापग्रहाः च भवन्ति चेत् अरिष्टयोगेन मात्रा सह शिशोः मरणं भवति।

**राश्यन्तगे सद्भिः …………………… तुहिनांशुलग्ने॥८॥**

शुभग्रहदृष्टिरहितः चन्द्रः यस्य कस्यापि वा राशेः अन्तिमनवांशे, अन्ये ग्रहाः लग्नात् पञ्चमे नवमे च यदि भवन्ति तर्हि अरिष्टयोगेन शिशोः मरणं भवति।

यदि चन्द्रः लग्नभावे पापग्रहाः सप्तमभावे च भवन्ति तर्हि अपि अरिष्टयोगेन शिशोः मरणं भवति।

**अशुभसहिते ग्रस्ते चन्द्रे …………. शुभैरयुतेक्षिते ॥९॥**

चन्द्रग्रहणकाले यदि जननं तत्र चन्द्रः अशुभग्रहेण सह युतः, कुजः लग्नात् अष्टमे च स्यात् तर्हि मातुः शिशोः च मरणं सम्भवति इति वक्तव्यम्।

सूर्यग्रहणकाले यदि जननं तत्र लग्ने रविः, लग्नात् अष्टमे कुजः च यदि भवति तर्हि शस्त्रेण हेतुना मातुः शिशोः च मरणं भवति इति वक्तव्यम्।

यदि लग्ने रविः चन्द्रः वा भवति लग्नात् पञ्चमे नवमे अष्टमे वा शुभदृष्टिरहिताः पापग्रहाः भवन्ति तर्हि शिशोः मरणं भवति इति वक्तव्यम्।

**असितरवि …………………………………. न वीक्षिताः ॥१०॥**

यदि जन्मकाले व्ययभावे शनिः, नवमभावे रविः, लग्ने चन्द्रः, अष्टमे कुजः च भवति एतेषामुपरि गुरोः दृष्टिः च न भवति तर्हि शीघ्रं शिशोः मरणं भवति।

**सुतमदनव ………………… न विलोकितो वा॥११॥**

जन्मकाले लग्ने पञ्चमे सप्तमे अष्टमे नवमे द्वादशे वा अशुभयुतः चन्द्रः भवति चेत् सः अरिष्टयोगकरः भवति। यदि तत्स्थानस्थितस्य चन्द्रस्य उपरि बुधगुरुशुक्राणां दृष्टिः भवति तर्हि अरिष्टयोगभङ्गः वक्तव्यः।

**योगे स्थानं गतवति ……………… मुनिगदितम् ॥१२॥**

एतावता ११ श्लोकेषु अरिष्टयोगाः निरूपिताः तत्र योगकारकाणां ग्रहाणां मध्ये यः ग्रहः अत्यन्तं बलिष्ठः सः यस्मिन् राशौ वर्तते तं राशिम् अथवा चन्द्रस्थितराशिं लग्नराशिं वा चारवशात् चन्द्रः यदा आगच्छति तदा बलिष्ठस्य पापग्रहस्य दृष्टिः तदुपरि भवति चेत् तस्मिन् काले शिशोः मरणं भवति इति वक्तव्यम्।

# आयुर्दायाध्यायः

आयुषां दायः आयुर्दायः। दायः = विभागः। जातके रव्यादयः ग्रहाः स्वस्थितमित्र-शत्रु-उच्च-नीचादिराशिवशात् कियत् आयुः प्रयच्छन्ति इति गणितेन आयुषः साधनमेव आयुर्दायः इत्युच्यते। तत्र प्राधान्येन १)पिण्डायुर्दायः २)जीवशर्मायुर्दायः ३)अंशकायुर्दायः च अत्र निरूप्यते।

**१. पिण्डायुर्दायः -**

**मययवनमणित्थ ........................ स्वतुङ्गभेषु। १॥**

रव्यादयः ग्रहाः स्वकीये **उच्चराशौ उच्चांशे** च यदि भवन्ति तर्हि क्रमेण एतावन्ति वर्षाणि आयुः प्रयच्छन्ति –

| | |
|---|---|
| रविः – | १९ वर्षाणि |
| चन्द्रः – | २५ वर्षाणि |
| कुजः – | १५ वर्षाणि |
| बुधः – | १२ वर्षाणि |
| गुरुः – | १५ वर्षाणि |
| शुक्रः – | २१ वर्षाणि |
| शनिः – | २० वर्षाणि |

**नीचेऽतोऽर्धं ह्रसति च ततश्चान्तरस्थेऽनुपातः ... २॥**

यदि रव्यादयः ग्रहाः **नीचराशौ नीचांशे च** भवन्ति तर्हि पूर्वोक्तस्य आयुषः अर्धम् आयुः ददति, यथा -

| | |
|---|---|
| रविः – | ९ वर्षाणि ६ मासाः |
| चन्द्रः – | १२ वर्षाणि ६ मासाः |
| कुजः – | ७ वर्षाणि ६ मासाः |
| बुधः – | ६ वर्षाणि |
| गुरुः – | ७ वर्षाणि ६ मासाः |
| शुक्रः – | १० वर्षाणि ६ मासाः |
| शनिः – | १० वर्षाणि |

उच्चनीचयोः मध्ये अनुपाततः अर्थात् त्रैराशिकगणितेन आयुः साध्यम् ।

**लग्नायुर्दायः –**

लग्नस्य उच्चनीचराश्यभावात् प्रकारान्तरेण आयुः साध्यं भवति। यथा –

**होरात्वंशप्रतिममपरे राशितुल्यं वदन्ति।२॥**

लग्नस्य भुक्तांशवशात् गतशाशिसंख्यावशात् वा आयुः साध्यम् इत्यर्थः। तद्यथा- लग्नराशेः यावन्तः अंशाः भुक्ताः= गताः तदनुसारेण त्रैराशिकं कृत्वा वर्षाणि आनेतव्यानि। ततः परं कलाविकलाभ्यः मासदिनादिकम् आयुः साध्यम्। अथवा लग्नस्य ये गताः राशयः तावन्ति वर्षाणि, अंशकलाभ्यः मासादिकं साधनीयम्।

एवं रव्यादीनां ग्रहाणां पृथक् पृथक् वर्ष-मास-दिन-घटी-विघट्यात्मकम् आयुः संसाध्य तत्र हरणचतुष्टयं कृत्वा स्फुटम् आयुः आनेतव्यम् । तानि हरणानि यथा - 1) शत्रुक्षेत्रहरणम् 2)अस्तहरणम् 3)चक्रपातार्धहानिः 4)क्रूरोदयहरणम् च इति।

1) **शत्रुक्षेत्रहरणम् -**

**हित्वा वक्रं रिपुगृहगतैर्हीयते स्वत्रिभागः ।२॥**

रव्यादयः ग्रहाः यदि स्वकीयशत्रुराशौ भवन्ति तर्हि तेषाम् आयुषः तृतीयः भागः [ $\frac{1}{3}$ ] न्यूनः भवति। एतदेव शत्रुक्षेत्रहरणम् इत्युच्यते। परन्तु एतत् हरणं कुजस्य न कर्तव्यम् । (एवमेव चन्द्रस्य शत्रवः न सन्ति इत्यतः चन्द्रस्यापि शत्रुक्षेत्रहरणं नास्ति)

2) **अस्तहरणम् -**

**सूर्योच्छिन्नद्युतिषु च दलं प्रोज्झ्य शुक्रार्कपुत्रौ॥२॥**

ग्रहाणां मध्ये चन्द्रादयः यदा रवेः समीपम् आगच्छन्ति तदा तेषाम् अस्तमनं भवति। ते अस्तङ्गताः इत्युच्यन्ते। ये ग्रहाः सूर्यसान्निध्येन अस्तङ्गताः तेषाम् आयुषि अर्धभागः [ $\frac{1}{2}$ ] न्यूनः भवति। परन्तु एतत् हरणं शुक्रस्य शनेः च नास्ति। (रविः अन्येषां ग्रहाणाम् अस्तकारकः इत्यतः रवेः अपि एतत् हरणं न कर्तव्यम्)

3) **चक्रपातार्धहानिः -**

**सर्वार्धत्रिचरण ................................ तथाह सत्यः ॥३॥**

यदि लग्नात् व्ययभावम् आरभ्य विलोमतः सप्तमभावं (१२,११,१०,९,८,७) यावत् यत्र कुत्रापि पापग्रहाः भवन्ति तर्हि तेषाम् आयुषि क्रमेण पूर्णम्, [ $\frac{1}{2}$ ], [ $\frac{1}{3}$ ], [ $\frac{1}{4}$ ], [ $\frac{1}{5}$ ], [ $\frac{1}{6}$ ] एतावन्तः भागाः न्यूनाः भवन्ति। यदि तेषु भावेषु शुभग्रहाः भवन्ति तर्हि क्रमेण [ $\frac{1}{2}$ ], [ $\frac{1}{4}$ ], [ $\frac{1}{6}$ ], [ $\frac{1}{8}$ ], [ $\frac{1}{10}$ ], [ $\frac{1}{12}$ ] एतावन्तः अंशाः न्यूनाः भवन्ति। एतदेव

चक्रपातार्धहानिः अथवा चक्रार्धहानिः इत्युच्यते। तत्र यदि एकस्मिन् राशौ द्वौ त्रयः वा ग्रहाः भवन्ति तर्हि तेषां मध्ये बलिष्ठः यः एकः ग्रहः भवति तस्य एव हरणं कर्तव्यम्, न तु सर्वेषां ग्रहाणाम् इत्यर्थः। एतत् सत्याचार्यस्य मतम्।

**4) क्रूरोदयहरणम्**

**सार्धोदितोदितनवांशहतात् ……………………………… प्रयाति॥४॥**

लग्ने यदि कश्चित् पापग्रहः भवति तर्हि एव एतत् हरणं कर्तव्यम्। लग्नस्थः पापग्रहः सर्वेषामपि ग्रहाणाम् आयुषः हानिं कुरुते। अस्य एव नाम क्रूरोदयहरणम् इति। लग्नस्य वर्तमाननवांशसंख्यां सर्वेषां ग्रहाणां यत् आयुःप्रमाणं लब्धं तेन सह संगुणय्य १०८ अनया विभजेत्। तदा यल् वर्षादि प्रमाणं लभ्यते तावत् सर्वेषां ग्रहाणाम् आयुःप्रमाणेन न्यूनीकर्तव्यम्। तद्यथा –

$\frac{\text{लग्ननवांशसंख्या} \times \text{सर्वग्रहायुःप्रमाणम्}}{\text{१०८}}$ = वर्षादि फलं । एतत् फलं रव्यादीनां ग्रहाणाम् आयुःप्रमाणेन न्यूनीकर्तव्यम्। तदा स्फुटम् आयुःप्रमाणं लभ्यते।

**एवं पिण्डायुर्दायसाधनक्रमः ।**

## मनुष्यादीनां परमायुःप्रमाणम् –

**समाः षष्टिर्द्विघ्नी मनुजकरिणां ………………… च परमम् ॥५॥**

| | | |
|---|---|---|
| **मनुष्याणां हस्तिनां च** | - | **१२० वर्षाणि ५ दिनानि च** |
| **अश्वानाम्** | - | **३२ वर्षाणि** |
| **खराणाम् उष्ट्राणां च** | - | **२५ वर्षाणि** |
| **वृषभाणां महिषाणां च** | - | **२४ वर्षाणि** |
| **शुनकानाम्** | - | **१२ वर्षाणि** |
| **मेषादीनाम्** | - | **१६ वर्षाणि** |

## २. जीवशर्मायुर्दायः

**स्वमतेन किलाह जीवशर्मा ग्रहदायं परमायुषः स्वरांशम् ॥**

जीवशर्मनामकेन आचार्येण प्रोक्तः आयुर्दायः एव जीवशर्मायुर्दायः इत्युच्यते। मनुष्याणां परमम् आयुः यत् वर्तते तस्य सप्तमः अंशः एव [ $\frac{1}{7}$ ] सर्वेषां ग्रहाणां (उच्चराशौ उच्चांशे च स्थितानां) पृथक् पृथक् आयुःप्रमाणं भवति इति अस्य मतम्।

परमायुःप्रमाणं तावत् १२० वर्षाणि ५ दिनानि । अस्य सप्तमः अंशः इत्युक्ते - $\frac{120-5}{7}$ = 17व-1मा-12दि.

अतः एतावत् प्रमाणं उच्चराशौ उच्चांशे च स्थितानां रव्यादीनां ग्रहाणां पृथक् आयुः भवति। ततः परं पूर्वोक्तक्रमेण शत्रुक्षेत्रहरणम्, अस्तहरनम् , चक्रपातार्धहानिः, क्रूरोदययहरणं चेति हरणचतुष्टयं कर्तव्यम्। तदा स्फुटं जीवशर्मायुः लभ्यते।

## ३. अंशकायुर्दायः –

**ग्रहभुक्तनवांशराशितुल्यं बहुसाम्यं समुपैति सत्यवाक्यम्॥९॥**

सत्याचार्येण उक्तः आयुर्दायः एव अंशकायुर्दायः इत्युच्यते। अत्र ग्रहभुक्तनवांशवशात् गणितेन आयुः साध्यते। यथा – रव्यादीन् ग्रहान् (ग्रहस्फुटप्रमाणं) लिप्तीकृत्य शतद्वयेन विभजेत्। तदा लब्धं १२ संख्यया विभज्य शेषसंख्यया वर्षप्रमाणं ज्ञातव्यम्। अनन्तरं शेषेण पुनः त्रैराशिकगणितेन मासादीनाम् आनयनं कर्तव्यम्।

**अंशकायुर्दाये विशेषः –**

**स्वतुङ्गवक्रोपगतैः ................ उदीरितम्॥१०॥**

अत्र पूर्वोक्तवत् गणितेन रव्यादीनां ग्रहाणाम् आयुः संसाध्य अनन्तरं ये ग्रहाः स्वकीयोच्चराशौ भवन्ति अथवा वक्रगतिकाः भवन्ति तेषाम् आयुःप्रमाणं त्रिगुणं कर्तव्यम्। एवमेव ये ग्रहाः स्वराशौ स्वद्रेष्काणे स्वनवांशे वा भवन्ति तेषाम् आयुःप्रमाणं द्विगुणितं कर्तव्यम्। ततः परं शत्रुक्षेत्रहरणम् अस्तहरणं चक्रपातार्धहानिः चेति एतत् हरणत्रयं कर्तव्यम्। परन्तु क्रूरोदयहरणम् अत्र न कर्तव्यम्।

**अंशकायुर्दाये लग्नायुर्दायसाधनम् –**

**किन्त्वत्र भांशप्रतिमं ........... होरा ॥११॥**

ग्रहाणां यथा आयुः साधितं तथैव लग्नस्य अपि आयुः साध्यम्। अनन्तरं यदि लग्नं बलिष्ठं तर्हि लग्नराशिसंख्यातुल्यं वर्षं लग्नायुषि योज्यम्। तदा स्फुटं लग्नायुः भवति।

**अमितायुर्योगः –**

**गुरुशशिसहिते ............. विना स्यात् ॥१३॥**

यदि कर्काटकराशिः लग्नं, तस्मिन् लग्ने चन्द्रः गुरुः च भवतः, लग्नात् केन्द्रे बुधः शुक्रः च भवतः, अन्ये ग्रहाः ३,६,११ च यदि भवन्ति तर्हि अमितम् आयुः लभ्यते। अर्थात् गणितागतात् आयुषः अतिरिच्य बहुः अधिकम् आयुः ते जीवन्ति इति।

# बृहज्जातकोक्तः दशाक्रमः

**दशास्वरूपम्**

**उदयरविशशाङ्क...................... आपोक्लिमेऽपि॥१॥**

**आयुः कृतं येन हि .................... प्रथमोदितस्य॥२॥**

बृहज्जातके आयुर्दायदशाक्रमः उक्तः। अतः आयुर्दायाध्याये येन ग्रहेण यत्प्रमाणकम् आयुः दत्तं तदेव तस्य दशाप्रमाणमपि भवति इति चिन्तनीयम्। तत्र लग्न-रविचन्द्राणां मध्ये बलिष्ठः ग्रहः प्रथमदशाधिपः भवति। तदनन्तरं तस्य केन्द्रभावे विद्यमानानां ग्रहाणां दशाः बलाबलानुसारं-(बलिष्ठस्य आदौ बलहीनस्य तदनन्तरमिति) भवन्ति। प्रथमदशाधिपतेः केन्द्रभावस्थितग्रहदशानन्तरं तस्य पणपरभावस्थितग्रहदशाः बलाबलानुसारं भवन्ति। ततः परं प्रथमदशाधिपतेः आपोक्लिमभावस्थितग्रहदशाः बलाबलानुसारं भवन्ति।

**अन्तर्दशास्वरूपम्**

**एकर्क्षगोऽर्धम् .................. परिपाचयन्ति॥३॥**

आयुर्दायदशाक्रमे प्रत्येकं ग्रहस्य दशायां सर्वेषामपि ग्रहाणाम् अन्तर्दशाः न भवन्ति। दशाधिपतेः केषुचित् भावेषु स्थिताः ग्रहाः एव अन्तर्दशां प्रयच्छन्ति। स्थानानि यथा –

**१) दशाधिपतिस्थितराशिः**

**२) दशाधिपतेः 5-राशिः**

**३) दशाधिपतेः 9-राशिः**

**४) दशाधिपतेः 7-राशिः**

**५) दशाधिपतेः 4-राशिः**

**६) दशाधिपतेः 8-राशिः**

एवं दशाधिपतेः 1,5,9,7,4,8 भावेषु स्थिताः ग्रहाः एव अन्तर्दशां प्रयच्छन्ति। अन्तर्दशायाः प्रमाणं यथा-

- दशाधिपतिना सह स्थितः ग्रहः (दशाधिपतेः दशाप्रमाणात्) $\frac{1}{2}$ प्रमाणं ददाति ।
- दशाधिपतेः 5 भावे स्थितः ग्रहः (दशाधिपतेः दशाप्रमाणात्) $\frac{1}{3}$ प्रमाणं ददाति ।
- दशाधिपतेः 9 भावे स्थितः ग्रहः (दशाधिपतेः दशाप्रमाणात्) $\frac{1}{3}$ प्रमाणं ददाति ।
- दशाधिपतेः 7 भावे स्थितः ग्रहः (दशाधिपतेः दशाप्रमाणात्) $\frac{1}{7}$ प्रमाणं ददाति ।
- दशाधिपतेः 4 भावे स्थितः ग्रहः (दशाधिपतेः दशाप्रमाणात्) $\frac{1}{4}$ प्रमाणं ददाति ।
- दशाधिपतेः 8 भावे स्थितः ग्रहः (दशाधिपतेः दशाप्रमाणात्) $\frac{1}{4}$ प्रमाणं ददाति ।

| अन्तर्दशाधिपाः | एकर्क्षगः | त्रिकोणगृहगः | स्मरगः | चतुरस्रगतः |
|---|---|---|---|---|
| अन्तर्दशाप्रमाणं | $\frac{1}{2}$ | $\frac{1}{3}$ | $\frac{1}{7}$ | $\frac{1}{4}$ |

**उदाहरणम् – 1.**

<table>
<tr><td>लग्नम्</td><td></td><td>गुरुः<br>शनिः</td><td></td></tr>
<tr><td></td><td colspan="2" rowspan="2">स्वाती एन् एस्</td><td></td></tr>
<tr><td></td><td>कुजः</td></tr>
<tr><td></td><td>शुक्रः</td><td>रविः<br>बुधः</td><td>चन्द्रः</td></tr>
</table>

अत्र जातके दशाक्रमः यथा –

१. लग्नदशा [प्रथमदशा]

२. चन्द्रदशा } केन्द्रे

३. रविदशा
४. बुधदशा } पणपरे

५. कुजदशा
६. शनिदशा
७. गुरुदशा
८. शुक्रदशा } आपोक्लिमे

इदानीं लग्नदशायाम् अन्तर्दशां विचारयामः।

- अत्र लग्ने कोऽपि ग्रहः नास्ति। अतः एकर्क्षगस्य अन्तर्दशा – न विद्यते।
- लग्नात् पञ्चमे ग्रहः नास्ति। परन्तु नवमे शुक्रः वर्तते। अतः त्रिकोणगृहगस्य अन्तर्दशा - $\frac{1}{3}$
- लग्नात् सप्तमे चन्द्रः अस्ति। अतः स्मरगस्य अन्तर्दशा - $\frac{1}{7}$
- लग्नात् चतुर्थे ग्रहः नास्ति। परन्तु अष्टमे रविबुधौ स्तः, अनयोः मध्ये बलिष्ठः बुधः। अतः चतुरस्रगस्य अन्तर्दशा - $\frac{1}{4}$

अतः अत्र लग्नदशायां शुक्रस्य चन्द्रस्य बुधस्य च अन्तर्दशाः भवन्ति इति ज्ञायते। परन्तु सर्वेषामपि दशायां तत्तदन्तर्दशाः आदौ भवन्ति इति सामान्यः नियमः । अतः लग्नदशायां –

1. **लग्नस्य अन्तर्दशा**
2. **शुक्रस्य अन्तर्दशा**
3. **चन्द्रस्य अन्तर्दशा**
4. **बुधस्य अन्तर्दशा**

च भवति। (यदि पञ्चमे नवमे च उभयत्र ग्रहाः भवन्ति तर्हि तयोः मध्ये बलिष्ठस्य अन्तर्दशा आदौ बलहीनस्य अनन्तरम् इति क्रमः)

तत्र लग्नदशायाम् –

लग्नान्तर्दशाप्रमाणम् – $\frac{1}{1}$ (इति ज्ञेयम्)

शुक्रान्तर्दशाप्रमाणम् – $\frac{1}{3}$

चन्द्रान्तर्दशाप्रमाणम् – $\frac{1}{7}$

बुधान्तर्दशाप्रमाणम् – $\frac{1}{4}$

ततः परम् एतेषां प्रमाणं वर्षरूपेण आनेतव्यम्। तदर्थं क्रमः यथा –

**स्थानान्यथैतानि ………………… दशाप्रभेदः॥४॥**

तत्रादौ पूर्वोक्तानां स्थानानां समच्छेदः कर्तव्यः। यथा –

$\frac{1}{1}, \frac{1}{3}, \frac{1}{7}, \frac{1}{4}$

अत्र 1,3,7,4 एतासां समच्छेदसंख्या 84 | अतः समच्छेदः क्रियते चेत् –

$\frac{84}{84}, \frac{28}{84}, \frac{12}{84}, \frac{21}{84}$

एतेषां योगः -

$$\frac{84}{84} + \frac{28}{84} + \frac{12}{84} + \frac{21}{84} = \frac{84+28+12+21}{84} = \frac{145}{84}$$

योगात् अनन्तरं छेदस्य अपेक्षा न भवति। अतः छेदस्य (84 इत्यस्य) त्यागः कर्तव्यः। प्रत्येकम् अंशाः (84,28,12,21 इति) तथा अंशानां योगः (145 इति) गणितार्थम् अपेक्षिताः भवन्ति।

**अत्र इदानीं लग्नदशाप्रमाणं 12 वर्षाणि इति कल्पयामः।** तर्हि लग्नस्य अन्तर्दशावर्षप्रमाणम् एवं भवति –

| | | |
|---|---|---|
| 145 | → | 84 चेत् |
| 12 | → | ? |

$\frac{12 \times 84}{145}$ = 6.951 = 6 वर्षाणि, 11 मासाः, 12 दिनानि च, लग्नदशायां लग्नान्तर्दशाप्रमाणम् ।

लग्नदशायां शुक्रान्तर्दशाप्रमाणम् -

| | | |
|---|---|---|
| 145 | → | 28 चेत् |
| 12 | → | ? |

$\frac{12 \times 28}{145}$ = $2.317$ = 2 वर्षाणि, 3 मासाः, 25 दिनानि च, लग्नदशायां शुक्रान्तर्दशाप्रमाणम् ।

लग्नदशायां चन्द्रान्तर्दशाप्रमाणम् -

| | | |
|---|---|---|
| 145 | → | 12 चेत् |
| 12 | → | ? |

$\frac{12 \times 12}{145}$ = $0.993$ = 0 वर्षाणि, 11 मासाः, 27 दिनानि च, लग्नदशायां चन्द्रान्तर्दशाप्रमाणम् ।

लग्नदशायां बुधान्तर्दशाप्रमाणम् -

| | | |
|---|---|---|
| 145 | → | 21 चेत् |
| 12 | → | ? |

$\frac{12 \times 21}{145}$ = $1.7379$ = 1 वर्षाणि, 8 मासाः, 26 दिनानि च, लग्नदशायां बुधान्तर्दशाप्रमाणम् ।

सर्वेषाम् अन्तर्दशाप्रमाणं योजयामः चेत् पूर्णं लग्नदशावर्षप्रमाणं लभ्यते। यथा -

| | |
|---|---|
| लग्नदशायां लग्नान्तर्दशाप्रमाणम् | - 6-11-12 |
| लग्नदशायां शुक्रान्तर्दशाप्रमाणम् | - 2- 3-25 |
| लग्नदशायां चन्द्रान्तर्दशाप्रमाणम् | - 0-11-27 |
| लग्नदशायां बुधान्तर्दशाप्रमाणम् | - 1- 8-26 |
| लग्नदशावर्षप्रमाणम् | -12-0-00 |

**उदाहरणम् – 2.**

| | | | |
|---|---|---|---|
| | | गुरुः<br>शनिः | लग्नम् |
| | गायत्री वि एस् | | |
| शुक्रः | | | |
| रविः<br>बुधः | | चन्द्रः<br>कुजः | |

अत्र जातके दशाक्रमः यथा –

१. रविदशा [प्रथमदशा]

२. बुधदशा
३. लग्नदशा
} केन्द्रे

४. शुक्रदशा
५. चन्द्रदशा
६. कुजदशा
} पणपरे

७. शनिदशा
८. गुरुदशा
} आपोक्लिमे

इदानीं रविदशायाम् अन्तर्दशां विचारयामः -

- अत्र रविणा सह बुधः अस्ति। अतः एकर्क्षगस्य अन्तर्दशा – $\frac{1}{2}$
- रवुतः पञ्चमे नवमे च ग्रहः नास्ति। अतः त्रिकोणगृहगस्य अन्तर्दशा – नास्ति।
- रवितः सप्तमे लग्नम् अस्ति। अतः स्मरगस्य अन्तर्दशा - $\frac{1}{7}$
- रवितः चतुर्थे अष्टमे च ग्रहः नास्ति। अतः चतुरस्रगस्य अन्तर्दशा - नास्ति

अतः अत्र रविदशायां बुधस्य लग्नस्य च अन्तर्दशे भवतः इति ज्ञायते। परन्तु सर्वेषामपि दशायां तत्तदन्तर्दशाः आदौ भवन्ति इति सामान्यः नियमः । अतः रविदशायां –

**१. रवेः अन्तर्दशा**

**२. बुधस्य अन्तर्दशा**

**३. लग्नस्य अन्तर्दशा**

च भवति।

तत्र रविदशायाम् –

रव्यन्तर्दशाप्रमाणम् – $\frac{1}{1}$ (इति ज्ञेयम्)

बुधान्तर्दशाप्रमाणम् – $\frac{1}{2}$

लग्नान्तर्दशाप्रमाणम् – $\frac{1}{7}$

ततः परम् एतेषां प्रमाणं वर्षरूपेण आनेतव्यम्। तदर्थं क्रमः यथा –

तत्रादौ पूर्वोक्तानां स्थानानां समच्छेदः कर्तव्यः। यथा –

$\frac{1}{1}, \frac{1}{2}, \frac{1}{7}$

अत्र 1,2,7 एतासां समच्छेदसंख्या 14 | अतः समच्छेदः क्रियते चेत् –

$\frac{14}{14}, \frac{7}{14}, \frac{2}{14}$

एतेषां योगः -

$$\frac{14}{14} + \frac{7}{14} + \frac{2}{14} = \frac{14+7+2}{14} = \frac{23}{14}$$

योगात् अनन्तरं छेदस्य अपेक्षा न भवति। अतः छेदस्य (14 इत्यस्य) त्यागः कर्तव्यः। प्रत्येकम् अंशाः (14,7,2 इति) तथा अंशानां योगः (23 इति) गणितार्थम् अपेक्षिताः भवन्ति।

**अत्र इदानीं रविदशाप्रमाणं 10 वर्षाणि इति कल्पयामः।** तर्हि रवेः अन्तर्दशावर्षप्रमाणम् एवं भवति –

23 → 14 चेत्

10 → ?

$\frac{10\times14}{23}$ = 6.0869 = 6 वर्षाणि, 1 मासः, 1 दिनं च, रविदशायां रव्यन्तर्दशाप्रमाणम् ।

रविदशायां बुधान्तर्दशाप्रमाणम् -

| | |
|---|---|
| 23 → | 7 चेत् |
| 10 → | ? |

$\frac{10 \times 7}{23} = 3.0434$ = 3 वर्षाणि, 0 मासाः, 15 दिनानि च, रविदशायां बुधान्तर्दशाप्रमाणम् ।

रविदशायां लग्नान्तर्दशाप्रमाणम् -

| | |
|---|---|
| 23 → | 2 चेत् |
| 10 → | ? |

$\frac{10 \times 2}{23} = 0.8695$ = 0 वर्षम्, 10 मासाः, 14 दिनानि च, रविदशायां लग्नान्तर्दशाप्रमाणम् ।

सर्वेषाम् अन्तर्दशाप्रमाणं योजयामः चेत् पूर्णं रविदशावर्षप्रमाणं लभ्यते। यथा -

| | |
|---|---|
| रविदशायां रव्यन्तर्दशाप्रमाणम् | - 6-01- 1 |
| रविदशायां बुधान्तर्दशाप्रमाणम् | - 3-00-15 |
| रविदशायां लग्नान्तर्दशाप्रमाणम् | - 0-10-14 |
| रविदशावर्षप्रमाणम् | -10-0-00 |

**उदाहरणम् – ३.**

| | | | |
|---|---|---|---|
| | गुरुः<br>शनिः | | |
| | **देवकुमार के एस्** | | चन्द्रः |
| | | | शुक्रः |
| लग्नम् | कुजः | बुधः | रविः |

अत्र जातके दशाक्रमः यथा –

१. लग्नदशा [प्रथमदशा]

२. रविदशा } केन्द्रे

३. बुधदशा
४. गुरुदशा
५. चन्द्रदशा
६. शनिदशा } पणपरे

७. कुजदशा
८. शुक्रदशा } आपोक्लिमे

इदानीं लग्नदशायाम् अन्तर्दशां विचारयामः।

- अत्र लग्ने कोऽपि ग्रहः नास्ति। अतः एकर्क्षगस्य अन्तर्दशा – न विद्यते।
- लग्नात् पञ्चमे गुरुशनी स्तः। अनयोः मध्ये बलिष्ठः गुरुः। अतः त्रिकोणगृहगस्य गुरोः अन्तर्दशा - $\frac{1}{3}$
- लग्नात् नवमे शुक्रः। अतः त्रिकोणगृहगस्य शुक्रस्य अन्तर्दशा - $\frac{1}{3}$
- लग्नात् सप्तमे कोऽपि ग्रहः नास्ति। अतः स्मरगस्य अन्तर्दशा – न विद्यते।
- लग्नात् चतुर्थे ग्रहः नास्ति। परन्तु अष्टमे चन्द्रः अस्ति। अतः चतुरस्रगस्य अन्तर्दशा - $\frac{1}{4}$

अतः अत्र लग्नदशायां गुरोः शुक्रस्य चन्द्रस्य च अन्तर्दशाः भवन्ति इति ज्ञायते। परन्तु सर्वेषामपि दशायां तत्तदन्तर्दशाः आदौ भवन्ति इति सामान्यः नियमः । अतः लग्नदशायां –

1. **लग्नस्य अन्तर्दशा**
2. **गुरोः अन्तर्दशा**
3. **शुक्रस्य अन्तर्दशा**
4. **चन्द्रस्य अन्तर्दशा**

च भवति। अतः लग्नदशायाम् –

लग्नान्तर्दशाप्रमाणम् – $\frac{1}{1}$ (इति ज्ञेयम्)

गुर्वन्तर्दशाप्रमाणम् - $\frac{1}{3}$

शुक्रान्तर्दशाप्रमाणम् – $\frac{1}{3}$

चन्द्रान्तर्दशाप्रमाणम् – $\frac{1}{4}$

ततः परम् एतेषां प्रमाणं वर्षरूपेण आनेतव्यम्। तदर्थं क्रमः यथा –

तत्रादौ पूर्वोक्तानां स्थानानां समच्छेदः कर्तव्यः। यथा –

$$\frac{1}{1}, \frac{1}{3}, \frac{1}{3}, \frac{1}{4}$$

अत्र 1,3,3,4 एतासां समच्छेदसंख्या 12 | अतः समच्छेदः क्रियते चेत् –

$$\frac{12}{12}, \frac{4}{12}, \frac{4}{12}, \frac{3}{12}$$

एतेषां योगः -

$$\frac{12}{12} + \frac{4}{12} + \frac{4}{12} + \frac{3}{12} = \frac{12+4+4+3}{12} = \frac{23}{12}$$

योगात् अनन्तरं छेदस्य अपेक्षा न भवति। अतः छेदस्य (12 इत्यस्य) त्यागः कर्तव्यः। प्रत्येकम् अंशाः (12,4,4,3 इति) तथा अंशानां योगः (23 इति) गणितार्थम् अपेक्षिताः भवन्ति।

**अत्र इदानीं लग्नदशाप्रमाणं 20 वर्षाणि इति कल्पयामः।** तर्हि लग्नस्य अन्तर्दशावर्षप्रमाणम् एवं भवति –

| | | |
|---|---|---|
| 23 | → | 12 चेत् |
| 20 | → | ? |

$\frac{20\times12}{23}$ = 10.4347 = 10 वर्षाणि, 5 मासाः, 6 दिनानि च, लग्नदशायां लग्नान्तर्दशाप्रमाणम्

लग्नदशायां गुर्वन्तर्दशाप्रमाणम् -

| | | |
|---|---|---|
| 23 | → | 4 चेत् |
| 20 | → | ? |

$\frac{20\times4}{23}$ = 3.478= 3 वर्षाणि, 5 मासाः, 22 दिनानि च, लग्नदशायां गुर्वन्तर्दशाप्रमाणम् ।

एतत्प्रमाणमेव लग्नदशायां शुक्रान्तर्दशाप्रमाणम् अपि भवति। अतः –

लग्नदशायां शुक्रान्तर्दशाप्रमाणम् - 3 वर्षाणि, 5 मासाः, 22 दिनानि च ।

लग्नदशायां चन्द्रान्तर्दशाप्रमाणम् -

| | | |
|---|---|---|
| 23 | → | 3 चेत् |
| 20 | → | ? |

$\frac{20\times3}{23}$ = 2.60869 = 2 वर्षे, 7 मासाः, 9 दिनानि च, लग्नदशायां चन्द्रान्तर्दशाप्रमाणम् ।


सर्वेषाम् अन्तर्दशाप्रमाणं योजयामः चेत् पूर्णं लग्नदशावर्षप्रमाणं लभ्यते। यथा -

| | |
|---|---|
| लग्नदशायां लग्नान्तर्दशाप्रमाणम् | - 10-5-07 |
| लग्नदशायां गुर्वन्तर्दशाप्रमाणम् | - 3-05-22 |
| लग्नदशायां शुक्रान्तर्दशाप्रमाणम् | - 3-05-22 |
| लग्नदशायां चन्द्रान्तर्दशाप्रमाणम् | - 2-07-09 |
| लग्नदशावर्षप्रमाणम् | - 20-00-00 |

# नाभसयोगाः

नभसः इमे नाभसाः, नाभसाश्च ते योगाः नाभसयोगाः ।

नाभसयोगे ४ प्रभेदाः सन्ति। १. आकृतियोगाः, २. संख्यायोगाः, ३. आश्रययोगाः, ४. दलयोगौ चेति। तत्र पुनः तेषु चतुर्षु योगेषु अन्तर्भेदाः भवन्ति। यथा – आकृतियोगे – २०, संख्यायोगे – ७, आश्रययोगे – ३, दलयोगे – २ ।



तत्र ''नवदिग्वसवः...... तत्समासः'' ॥ १॥ इत्यस्मिन् श्लोके नाभसयोगानां विकल्पाः प्रतिपादिताः । तत्र नाभसयोगेषु पूर्वोक्तप्रकारेण २०+७+३+२= ३२ भेदाः भवन्ति। एतेषु एव विकल्पाः पूर्वाचार्यैः प्रोक्ताः, तद्यथा – नाभसयोगेषु विकल्पद्वयं (आकृतियोगाः+संख्यायोगाः) यदि स्वीक्रियते तर्हि २०+७=२७ प्रभेदाः भवन्ति। यदि नाभसयोगेषु विकल्पत्रयं (आकृतियोगाः+संख्यायोगाः+आश्रययोगाः) स्वीक्रियते तर्हि २०+७+३=३० प्रभेदाः भवन्ति। यदि पुनः नाभसयोगेषु विकल्पचतुष्टयं (आकृतियोगाः+संख्यायोगाः+आश्रययोगाः+दलयोगौ) स्वीक्रियते तर्हि २०+७+३+२=३२ प्रभेदाः भवन्ति। अमुम् एव अंशं श्लोके संख्याचमत्कृत्या वराहमिहिरः प्रतिपादितवान्। यथा -

नव ९ × ३ (त्रिक) = २७ विकल्पद्वयम्

दिक् १० × ३ (अग्नि) = ३० विकल्पत्रयम्

वसवः ८ × ४ (वेद) = ३२ विकल्पचतुष्टयम्


परन्तु यवनाचार्याः स्वग्रन्थे नाभसयोगाः कथं सम्भवन्ति इति सूक्ष्मरूपेण विमृश्य ६००×३= १८०० एतावत्संख्याकाः प्रभेदाः सम्भवन्ति इति प्रत्यपादयन् । विस्तरशः विभागं कल्पयामः चेत् एतावन्तः प्रभेदाः भवितुं शक्याः, परन्तु लघुग्रन्थे एतावतां प्रभेदानां सङ्ग्रहः कर्तुं न शक्यते इत्यतः अस्मिन् ग्रन्थे प्रधानरूपेण ३२ प्रभेदानाम् एव सङ्ग्रहः वराहमिहिरेण कृतः ।

रज्जुर्मुशलम् ..... पराशरेण ॥२॥ इति द्वितीये श्लोके त्रयः आश्रययोगाः द्वौ दलयोगौ चेति

पञ्च नाभसयोगाः प्रोक्ताः वर्तन्ते। यद्यथा -

# नाभसयोगाः

## आश्रययोगाः





१. रज्जुः - सर्वेऽपि ग्रहाः (रव्यादयः सप्त) चरराशिषु भवेयुः


२. मुशलम् - सर्वेऽपि ग्रहाः (रव्यादयः सप्त) स्थिरराशिषु भवेयुः


३. नलः - सर्वेऽपि ग्रहाः (रव्यादयः सप्त) द्विस्वभावराशिषु भवेयुः

# नाभसयोगाः

## आश्रययोगाः













विशेषः – अत्र सर्वे ग्रहाः चरराशौ स्थिरराशौ उभयराशौ वा भवेयुः इत्युक्ते चतुर्षु चरराशिषु, चतुर्षु स्थिरराशिषु, चतुर्षु उभयराशिषु च भवेयुः इति नियमः नास्ति। यथासम्भवं चतुर्षु, त्रिषु द्वयोः एकस्मिन् वा चरादिषु राशिषु सर्वे ग्रहाः भवन्ति चेदपि योगः अवश्यं भवति । यथा -

# नाभसयोगाः

## आश्रययोगाः








एवमेव अन्येषु अपि योगेषु विभागः कल्पनीयः

# नाभसयोगाः

## दलयोगः




१. स्रक् (माला) - सर्वे शुभग्रहाः केन्द्रभावे भवेयुः

२. सर्पः - सर्वे अशुभग्रहाः केन्द्रभावे भवेयुः

# नाभसयोगाः

## दलयोगः







अत्रापि पूर्ववत् एकस्मिन्नेव अथवा द्वयोः त्रिषु चतुर्षु वा केन्द्रभावेषु शुभाशुभानां स्थित्या दलयोगयोः सम्भवः वाच्यः

## नाभसयोगाः

### आकृतियोगाः – २० प्रभेदाः

| | | | |
|---|---|---|---|
| १. गदायोगः | ६. वज्रयोगः | ११. इषुयोगः | १६. छत्रयोगः |
| २. शकटयोगः | ७. यवयोगः | १२. शक्तियोगः | १७. चापयोगः |
| ३. विहगयोगः | ८. कमलयोगः | १३. दण्डयोगः | १८. अर्धचन्द्रयोगः |
| ४. शृङ्गाटकयोगः | ९. वापीयोगः | १४. नौकायोगः | १९. समुद्रयोगः |
| ५. हलयोगः | १०. यूपयोगः | १५. कूटयोगः | २०. चक्रयोगः |

## नाभसयोगाः

### आकृतियोगाः – २० प्रभेदाः


**आसन्नकेन्द्रभवनद्वयगैर्गदाख्यस्तन्वस्तगेषु शकटं विहगः खबन्ध्वोः।**
**श्रृङ्गाटकं नवमपञ्चमलग्नसंस्थैर्लग्नान्यगैर्हलमिति प्रवदन्ति तज्ज्ञाः ॥ ४ ॥**

अस्मिन् श्लोके ५ आकृतियोगाः सङ्गृहीताः। तेषां लक्षणं क्रमशः यथा -

१. **गदायोगः** - (आसन्नकेन्द्रभवनद्वयगैर्गदाख्यः) सर्वे ग्रहाः समीपवर्तिकेन्द्रभावद्वये भवेयुः। केन्द्रभावाः – १-४-७-१० । समीपवर्तिकेन्द्रभावद्वयम् इत्युक्ते समीपवर्तिनोः द्वयोः केन्द्रभावयोः इति। अर्थात् सर्वे ग्रहाः लग्न-चतुर्थयोः, चतुर्थ-सप्तमयोः, सप्तम-दशमयोः, लग्न-दशमयोः वा यथासम्भवं यदि भवन्ति तर्हि गदायोगः स्यात् ।

# नाभसयोगाः

## आकृतियोगाः – (१) **गदायोगः- ४ भेदाः** यथा -





विशेषः – सर्वेषां ग्रहाणां स्थितिः आसन्नकेन्द्रभावयोः मध्ये भवेत् इत्येव नियमः। तयोः द्वयोः केन्द्रभावयोः मध्ये यथासम्भवं ग्रहाणां संख्या भवितुमर्हति । एवं गदायोगः चतुष्प्रकारकः भवति ।

# नाभसयोगाः

## आकृतियोगाः – (२) शकटयोगः


२. शकटयोगः – (**तन्वस्तगेषु शकटम्**) सर्वे ग्रहाः तन्वस्तयोः = लग्नसप्तमयोः (तनुः=शरीरम्=लग्नभावः, अस्तः=सप्तमभावः) यदि भवन्ति तर्हि शकटयोगः सम्भवति ।



# नाभसयोगाः

## आकृतियोगाः – (३) विहगयोगः=अण्डजयोगः=पक्षियोगः


३. विहगयोगः – (**विहगः खबन्ध्वोः**) सर्वे ग्रहाः खबन्ध्वोः = दशमचतुर्थयोः (खम्=दशमभावः, बन्धुः=चतुर्थभावः) यदि भवन्ति तर्हि विहगयोगः सम्भवति ।



# नाभसयोगाः

## आकृतियोगाः – (४) शृङ्गाटकयोगः


४.शृङ्गाटकयोगः – (**शृङ्गाटकं नवमपञ्चमलग्नसंस्थैः**) सर्वे ग्रहाः लग्न-पञ्चम-नवमभावेषु (१-५-९भावेषु) यदि भवन्ति तर्हि शृङ्गाटकयोगः सम्भवति ।





# नाभसयोगाः

## आकृतियोगाः – (५) हलयोगः

५. हलयोगः – (**लग्नान्यगैर्हलमिति**) पूर्वं लग्न-पञ्चम-नवमभावेषु (१-५-९भावेषु) सर्वे ग्रहाः यदि भवन्ति इति लग्नात् त्रिकोणराशिभ्यां शृङ्गाटकयोगः सम्भवति इत्युक्तम् । इदानीं लग्नान्यगैः अर्थात् द्वितीयात् तृतीयात् चतुर्थात् च त्रिकोणराश्योः सर्वे ग्रहाः भवन्ति चेत् हलयोगः भवति इति उच्यते। अर्थात् लग्नात् २-६-१० भावेषु, ३-७-११ भावेषु, ४-८-१२ भावेषु च यथासम्भवं सर्वे ग्रहाः भवन्ति चेत् हलयोगः भवति ।



नाभसयोगाः

आकृतियोगाः – २० प्रभेदाः

**शकटाण्डजवच्छुभाशुभैर्वज्रं तद्विपरीतगैर्यवः।**
**कमलं तु विमिश्रसंस्थितैर्वापी तद्यदि केन्द्रबाह्यतः ॥ ४ ॥**

अस्मिन् श्लोके ४ आकृतियोगाः सङ्गृहीताः। तेषां लक्षणं क्रमशः यथा -


६. **वज्रयोगः - (शकटाण्डजवच्छुभाऽशुभैर्वज्रम्)** शकटयोगवत् शुभग्रहाणां विहगयोगवत् अशुभग्रहाणां च स्थितिः यदि भवति तर्हि वज्रयोगः सम्भवति । अर्थात् १-७ भावयोः शुभग्रहाः, ४-१० भावयोः अशुभग्रहाश्च भवेयुः।


७. **यवयोगः – (तद्विपरीतगैर्यवः)** वज्रयोगः एव विपरीततया यदि भवति अर्थात् १-७ भावयोः अशुभग्रहाः, ४-१० भावयोः शुभग्रहाश्च यदि भवन्ति तर्हि यवयोगः भवति ।

# नाभसयोगाः

## आकृतियोगाः – (६) वज्रयोगः  (७) यवयोगः

○ = शुभग्रहः  ● = अशुभग्रहः







# नाभसयोगाः

## आकृतियोगाः – (८) कमलयोगः

८. **कमलयोगः - (कमलं तु विमिश्रसंस्थितैः)** शुभग्रहाः पापग्रहाश्च मिश्रिताः सन्तः केन्द्रभावेषु यदि भवन्ति तर्हि कमलयोगः भवति।

○ = शुभग्रहः ● = अशुभग्रहः




एवं यथासम्भवं विकल्पाः कर्तव्याः

# नाभसयोगाः


## आकृतियोगाः – (९) वापीयोगः

**९. वापीयोगः – (वापी तद्यदि केन्द्रबाह्यतः)** शुभग्रहाः पापग्रहाश्च मिश्रिताः सन्तः पणपरभावेषु आपोक्लिमभावेषु वा यदि भवन्ति तर्हि वापीयोगः सम्भवति । अयं योगः द्विधा भवति – १) शुभग्रहाः पापग्रहाश्च मिश्रिताः सन्तः पणपरभावेषु भवेयुः । २) शुभग्रहाः पापग्रहाश्च मिश्रिताः सन्तः आपोक्लिमभावेषु भवेयुः । इति ।

# नाभसयोगाः

## आकृतियोगाः – (९) वापीयोगः

○ = शुभग्रहः ● = अशुभग्रहः




अत्रापि कमलयोगवत् शुभपापग्रहाणां यथासम्भवं मिश्रणेन विकल्पाः ऊहनीयाः

## नाभसयोगाः

### आकृतियोगाः – २० प्रभेदाः

**कण्टकादिप्रवृत्तैस्तु चतुर्गृहगतैर्ग्रहैः।**

**यूपेषुशक्तिदण्डाख्या होराद्यैः कण्टकैः क्रमात्॥ ७॥**

अस्मिन् श्लोके ४ आकृतियोगाः सङ्गृहीताः। तेषां लक्षणं क्रमशः यथा – होराद्यैः = लग्नाद्यैः कण्टकैः=केन्द्रभावैः क्रमात्, कण्टकादिप्रवृत्तैः= लग्न-चतुर्थ-सप्तम-दशमादिभिः, चतुर्गृहगतैः= चतुर्षु राशिषु स्थितैः रव्यादिभिः ग्रहैः यूपादयः योगाः भवन्ति। अर्थात् -

१०. **यूपयोगः** – लग्नात् चतुर्थभावपर्यन्तं ४ राशिषु सर्वे ग्रहाः भवेयुः ।


११. **इषुयोगः (बाणयोगः)** – चतुर्थात् सप्तमभावपर्यन्तं ४ राशिषु सर्वे ग्रहाः भवेयुः ।


१२. **शक्तियोगः** – सप्तमात् दशमपर्यन्तं ४ राशिषु सर्वे ग्रहाः भवेयुः ।


१३. **दण्डयोगः** – दशमात् लग्नपर्यन्तं ४ राशिषु सर्वे ग्रहाः भवेयुः ।


# नाभसयोगाः

## आकृतियोगाः



## नाभसयोगाः

### आकृतियोगाः – २० प्रभेदाः

**नौकूटच्छत्रचापानि तद्वत्सप्तर्क्षसंस्थितैः ॥**

**अर्धचन्द्रस्तु नावाद्यैः प्रोक्तस्त्वन्यर्क्षसंस्थितैः ॥ ८ ॥**

अस्मिन् श्लोके ५ आकृतियोगाः सङ्गृहीताः। तेषां लक्षणं क्रमशः यथा – तद्वत् = यूपादियोगवत् , सप्तर्क्षसंस्थितैः = सप्तसु राशिषु स्थितैः सर्वैः ग्रहैः नौकादयः ४ योगाः क्रमशः भवन्ति । अर्थात् -

१४. **नौकायोगः** – लग्नात् सप्तमभावपर्यन्तं ७ राशिषु सर्वे ग्रहाः भवेयुः ।


१५. **कूटयोगः** – चतुर्थात् दशमभावपर्यन्तं ७ राशिषु सर्वे ग्रहाः भवेयुः ।


१६. **छत्रयोगः** – सप्तमात् लग्नपर्यन्तं ७ राशिषु सर्वे ग्रहाः भवेयुः ।


१७. **चापयोगः** – दशमात् चतुर्थपर्यन्तं ७ राशिषु सर्वे ग्रहाः भवेयुः ।


# नाभसयोगाः

## आकृतियोगाः



## नाभसयोगाः

### आकृतियोगाः – २० प्रभेदाः

**१८. अर्धचन्द्रयोगः** – (**अर्धचन्द्रस्तु नावाद्यैः प्रोक्तस्त्वन्यर्क्षसंस्थितैः**) नावाद्यैः एव अन्यर्क्षसंस्थितैः = केन्द्रादिस्थानं हित्वा अन्यादिस्थानम् (पणपर-आपोक्लिमस्थानम्) आरभ्य स्थितैः सर्वैः ग्रहैः अर्धचन्द्रयोगः भवति। अस्मिन् योगे ८ भेदाः सम्भवन्ति, यथा –

1) द्वितीयात् अष्टमभावपर्यन्तं (२ - ८) सप्तसु राशिषु यथासंभवं सर्वे ग्रहाः यदि भवन्ति

2) तृतीयात् नवमभावपर्यन्तं (३ - ९) सप्तसु राशिषु यथासंभवं सर्वे ग्रहाः यदि भवन्ति

3) पञ्चमात् एकादशभावपर्यन्तं (५ - ११) सप्तसु राशिषु यथासंभवं सर्वे ग्रहाः यदि भवन्ति

4) षष्ठात् द्वादशभावपर्यन्तं (६ - १२) सप्तसु राशिषु यथासंभवं सर्वे ग्रहाः यदि भवन्ति

5) अष्टमात् द्वितीयभावपर्यन्तं (८ - २) सप्तसु राशिषु यथासंभवं सर्वे ग्रहाः यदि भवन्ति


6) नवमात् तृतीयभावपर्यन्तं (९ - ३) सप्तसु राशिषु यथासंभवं सर्वे ग्रहाः यदि भवन्ति

7) एकादशात् पञ्चमभावपर्यन्तं (११ - ७) सप्तसु राशिषु यथासंभवं सर्वे ग्रहाः यदि भवन्ति

8) द्वादशात् षष्ठभावपर्यन्तं (१२ - ६) सप्तसु राशिषु यथासंभवं सर्वे ग्रहाः यदि भवन्ति , इति ॥ यथा -

# नाभसयोगाः

## आकृतियोगाः – (१८) अर्धचन्द्रयोगः – ८ प्रभेदाः



# नाभसयोगाः

## आकृतियोगाः – २० प्रभेदाः

**एकान्तरगतैरर्थात्समुद्रः षड्गृहाश्रितैः।**

**विलग्नादिस्थितैश्चक्रमित्याकृतुजसङ्ग्रहः॥ ९ ॥**


अस्मिन् श्लोके २ आकृतियोगौ सङ्गृहीतौ। तयोः लक्षणं क्रमशः यथा – अर्थात्=अर्थः-धनम्=द्वितीयभावः तस्मात् , एकान्तरगतैः=एकैकराश्यन्तरितैः=एकं राशिं त्यक्त्वा तदग्रिमराशिस्थितैः, षड्गृहाश्रितैः= षड्सु राशिषु स्थितैः सर्वैः ग्रहैः , समुद्रः=समुद्रयोगः भवति। तेनैव क्रमेण विलग्नादिस्थितैः= लग्नभावात् एकान्तरगतैः षड्सु राशिषु स्थितैः सर्वैः ग्रहैः चक्रयोगः भवति । इति आकृतिजसङ्ग्रहः= एवंरूपेण विंशतिः आकृतियोगाः संगृहीताः ।


**१९. समुद्रयोगः** – २-४-६-८-१०-१२ भावेषु सर्वे ग्रहाः भवेयुः ।

**२०. चक्रयोगः** – १-३-५-७-९-११ भावेषु सर्वे ग्रहाः भवेयुः ।

# नाभसयोगाः

## आकृतियोगाः – (१९) समुद्रयोगः (२०) चक्रयोगः



# नाभसयोगाः

## संख्यायोगाः – ७ प्रभेदाः

**संख्यायोगास्स्युः सप्त सप्तर्क्षसंस्थैरेकापायाद्वल्लकी दामिनी च।**
**पाशः केदारः शूलयोगो युगं च गोलश्चान्यान्पूर्वमुक्तान्विहाय॥ १० ॥**

अस्मिन् श्लोके ७ संख्यायोगाः सङ्गृहीताः। ते च – १) वल्लकीयोगः(वीणायोगः) २) दामिनीयोगः ३) पाशयोगः ४) केदारयोगः ५) शूलयोगः ६) युगयोगः ७) गोलयोगः ।


सप्त= रव्यादयः सप्त ग्राहाः, एकापायात् = एकैकराशिन्यूनात्, सप्तर्क्षसंस्थैः = सप्तसु राशिषु स्थितैः, क्रमेण वीणादयः सप्त संख्यायोगाः स्युः ।


१) वीणायोगः - सर्वे ग्रहाः सप्तसु राशिषु यदि भवन्ति ।
२) दामिनीयोगः - सर्वे ग्रहाः षट्सु राशिषु यदि भवन्ति ।
३) पाशयोगः - सर्वे ग्रहाः पञ्चसु राशिषु यदि भवन्ति ।
४) केदारयोगः - सर्वे ग्रहाः चतुर्षु राशिषु यदि भवन्ति ।
५) शूलयोगः - सर्वे ग्रहाः त्रिषु राशिषु यदि भवन्ति ।
६) युगयोगः - सर्वे ग्रहाः द्वयोः राश्योः यदि भवन्ति ।
७) गोलयोगः - सर्वे ग्रहाः एकस्मिन् राशौ यदि भवन्ति ।


**विशेषः – श्लोके "पूर्वमुक्तान् विहाय" इत्युक्तम्। अस्य अयमर्थः – संख्यायोगाः सर्वेषां जातके नियतरूपेण भवन्त्येव, अतः यदि पूर्वोक्तानाम् आश्रय-आकृति-दलयोगानां सादृश्यं संख्यायोगेन सह भवति तर्हि संख्यायोगः फलप्रदः न भवति ।**


# नाभसयोगाः


## संख्यायोगाः – ७ प्रभेदाः








| नाभसयोगाः | | फलानि |
|---|---|---|
| आश्रययोगाः | रज्जुः | मात्सर्यम्, विदेशवासः, इतस्ततः अटनम् |
| | मुशलम् | सम्माननम्, धनम्, बहुकार्येषु आसक्तिः |
| | नलः | अङ्गवैकल्यम्, कार्येषु निपुणता, धनधान्यसम्पत्तिः |
| | | |
| दलयोगौ | माला | सर्वैश्वर्यप्राप्तिः |
| | सर्पः | दुःखम् |

| नाभसयोगाः | | फलानि |
|---|---|---|
| आकृतियोगाः | गदा | धनम्, जयनशीलता, धनार्जने आसक्तिः |
| | शकटम् | यानचालनवृत्तिः, रोगप्राप्तिः, दुष्टपत्नी(दुष्टभर्तृ)प्राप्तिः |
| | विहगः | सन्देशहरणम् (दौत्यम्), कलहकरणम्, अटनशीलता |
| | शृङ्गाटकम् | सर्वदा सुखम् |
| | हलम् | कृषिकरणम् |
| | वज्रम् | जीवनस्य आदिभागे अन्त्यभागे च सुखप्राप्तिः, शूरता |
| | यवः | जीवनस्य मध्यभागे सुखप्राप्तिः |
| | कमलम् | यशःप्राप्तिः, सौख्यम् |
| | वापी | सर्वदा अल्पसुखप्राप्तिः, धनसंग्रहशीलता |
| | यूपः | यजनपटुता, त्यागशीलता |

| नाभसयोगाः | | फलानि |
|---|---|---|
| आकृतियोगाः | इषुः | हिंस्रस्वभावः, बन्धनागाराधिपत्यम्, आयुधकरणम् |
| | शक्तिः | आलस्यम्, नीचकार्यकरणम्, सुख-धनहानिः |
| | दण्डः | प्रियजनेभ्यः वियोगः, नीचाश्रितवृत्तिः |
| | नौका | यशः, कार्पण्यम्, सुखदुःखयोः समानता |
| | कूटः | असत्यभाषणम्, बन्धनगृहाधिपः |
| | छत्रम् | स्वजनसुखकारिता |
| | चापः | शौर्यम्, जीवनस्य आदौ अन्तिमे च सुखप्राप्तिः |
| | अर्धचन्द्रः | सौन्दर्यम्, सौभाग्यम्, प्राधान्यम् |
| | समुद्रः | राजत्वप्राप्तिः, सर्वैश्वर्यप्राप्तिः |
| | चक्रम् | चक्रवर्तित्वम् |

| नाभसयोगाः | | फलानि |
|---|---|---|
| संख्यायोगाः | वल्लकी | संगीत-नृत्य-कलासु आसक्तिः |
| | दामिनी | दानशीलता, परोपकारिता |
| | पाशः | धनोपार्जनकौशलम्, सद्गुणशालित्वम् |
| | केदारः | कृषिकार्यकरणम् |
| | शूलम् | शौर्यम्, शरीरक्षतिः, धनार्जने आसक्तिः, अर्थराहित्यम् |
| | युगम् | धनदारिद्र्यम्, अधर्मासक्तिः |
| | गोलः | अज्ञानम्, दारिद्र्यम्, मालिन्यम्, आलस्यम् |
| | | |

# राजयोगाः

<table>
<tr><td></td><td>रविः</td><td>चन्द्रः<br>शुक्रः<br>बुधः</td><td></td></tr>
<tr><td></td><td colspan="2" rowspan="2">कर्किणि लग्ने तत्स्थे जीवे<br>चन्द्रसितज्ञैरायप्राप्तैः।<br>मेषगतेऽर्के जातं विद्यात्<br>विक्रमयुक्तं पृथ्वीनाथम् ॥<br>९॥</td><td>लग्नम्<br>गुरुः</td></tr>
<tr><td></td><td></td></tr>
<tr><td></td><td></td><td></td><td></td></tr>
</table>

# राजयोगाः

<table>
<tr><td></td><td>कुजः</td><td></td><td>बुधः</td></tr>
<tr><td></td><td rowspan="2" colspan="2">मृगमुखेऽर्कतनयस्तनुसंस्थः<br>क्रियकुलीरहरयोऽधिपयुक्ताः<br>मिथुनतौलिसहितौ बुधशुक्रौ<br>यदि तदा पृथुयशाः<br>पृथिवीशः ॥ १०॥</td><td>चन्द्रः</td></tr>
<tr><td>लग्नम्<br>शनिः</td><td>रविः</td></tr>
<tr><td></td><td></td><td>शुक्रः</td><td></td></tr>
</table>

# राजयोगाः

<table>
<tr><td>चन्द्रः<br>गुरुः</td><td></td><td></td><td>शुक्रः</td></tr>
<tr><td></td><td colspan="2" rowspan="2">स्वोच्चसंस्थे बुधे लग्ने<br>भृगौ मेषूरणाश्रिते।<br>सजीवेऽस्ते निशानाथे<br>राजा मन्दारयोः सुते॥ ११॥</td><td></td></tr>
<tr><td>शनिः<br>कुजः</td><td></td></tr>
<tr><td></td><td></td><td></td><td>लग्नम्<br>बुधः</td></tr>
</table>

राजयोगस्य सामान्यः नियमः -

उच्चस्वत्रिकोणगैर्बलस्थैः त्र्याद्यैर्भूपतिवंशजाः नरेन्द्राः ।
पञ्चादिभिरन्यवंशजाता हीनैर्वित्तयुता न भूमिपालाः॥ १३॥

- ❖ उच्चे स्वक्षेत्रे मूलत्रिकोणे वा यथासम्भवं – ३/४/५/६/७ ग्रहाः चेत् राजवंशजातानां राजयोगः ।
- ❖ उच्चे स्वक्षेत्रे मूलत्रिकोणे वा यथासम्भवं – ५/६/७ ग्रहाः चेत् अन्यवंशजातानां राजयोगः ।

- राजकुलोत्पन्नानां जातके ५/६/७ ग्रहाः उच्चे स्वक्षेत्रे मूलत्रिकोणे वा यथासम्भवं भवन्ति चेत् ते अवश्यं राजयोगं लभन्ते (राजाधिराजयोगः भवति) ।
- परन्तु अन्यकुलोत्पन्नानां जातके ३/४ ग्रहाः उच्चे स्वक्षेत्रे मूलत्रिकोणे वा यथासम्भवं भवन्ति चेत् ते राजयोगं न प्राप्नुवन्ति, केवलं धनिकाः भवन्ति ।

# राजयोगाः

<table>
<tr><td></td><td>लग्नम्<br>रविः<br>चन्द्रः</td><td></td><td></td></tr>
<tr><td>शनिः</td><td colspan="2" rowspan="2">लेखास्थेऽर्केऽजेन्दौ लग्ने<br>भौमे स्वोच्चे कुम्भे मन्दे ।<br>चापप्राप्ते जीवे राज्ञः<br>पुत्रं विद्यात्पृथ्वीनाथम्<br>॥ १४ ॥</td><td></td></tr>
<tr><td>कुजः</td><td></td></tr>
<tr><td>गुरुः</td><td></td><td></td><td></td></tr>
</table>

# राजयोगाः

| | | | |
|---|---|---|---|
| चन्द्रः | | कुजः<br>शनिः | |
| | स्वर्क्षे शुक्रे पातालस्थे<br>धर्मस्थानं प्राप्ते चन्द्रे ।<br>दुश्चिक्याङ्गप्राप्तिप्राप्तैः<br>शेषैर्जातः स्वामी भूमेः<br>॥ १५॥ | | लग्नम्<br>गुरुः |
| | | | |
| | | शुक्रः | बुधः<br>रविः |

| | | | |
|---|---|---|---|
| | कुजः<br>बुधः<br>रविः | शुक्रः | |
| लग्नम्<br>शनिः | स्वर्क्षे शुक्रे पातालस्थे<br>धर्मस्थानं प्राप्ते चन्द्रे ।<br>दुश्चिक्याङ्गप्राप्तिप्राप्तैः<br>शेषैर्जातः स्वामी भूमेः<br>॥ १५॥ | | |
| | | | |
| गुरुः | | चन्द्रः | |

# राजयोगाः

| | | | |
|---|---|---|---|
| | लग्नम्<br>शुभग्रहः | ● | ● |
| ● | सौम्ये वीर्ययुते ....॥ १६ ॥<br><br>योगसम्भवः यथा –<br>यः कोऽपि वा राशिः लग्नं भवतु, ततः ग्रहस्थितिः एतेषु स्थानेषु ..... | | |
| ● | | | |
| शुभग्रहः<br>● | | | ● |

| | | | |
|---|---|---|---|
| | | गुरुः | कुजः |
| शनिः | सौम्ये वीर्ययुते तनुयुक्ते<br>वीर्याढ्ये च शुभे शुभयाते।<br>धर्मार्थोपचयेष्वशेषैः<br>धर्मात्मा नृपजः पृथिवीशः<br>॥ १६ ॥ | | चन्द्रः |
| | | | |
| | रविः | शुक्रः | लग्नम्<br>बुधः |

अयमभिप्रायः – यः कोऽपि वा राशिः लग्नं भवतु, लग्ने नवमे च एकैकः शुभग्रहः, तथा नवम-द्वितीय-तृतीय-षष्ठ-दशम-एकादशसु भावेषु अन्ये ग्रहाः यथासम्भवं भवेयुः।

# राजयोगाः

## प्रथमः योगः

<table>
<tr><td>रविः<br>कुजः<br>बुधः , शुक्रः</td><td></td><td>लग्नम्<br>चन्द्रः</td><td>गुरुः</td></tr>
<tr><td></td><td colspan="2" rowspan="2">वृषोदये मूर्तिधनारिलाभगैः<br>शशाङ्कजीवार्कसुतापरैर्नृपः।<br>॥१७॥</td><td></td></tr>
<tr><td></td><td></td></tr>
<tr><td></td><td></td><td>शनिः</td><td></td></tr>
</table>

## द्वितीयः योगः

<table>
<tr><td></td><td></td><td></td><td></td></tr>
<tr><td></td><td colspan="2" rowspan="2">सुखे गुरौ खे<br>शशितीक्षदीधिती<br>यमोदये<br>लाभगतैर्नृपोपरैः ॥१७॥</td><td>रविः<br>चन्द्रः</td></tr>
<tr><td>गुरुः</td><td>कुजः<br>बुधः<br>शुक्रः</td></tr>
<tr><td></td><td></td><td>लग्नम्<br>शनिः</td><td></td></tr>
</table>

द्वितीये योगे अयं विशेषः – यः कोऽपि वा राशिः लग्नं भवतु, लग्ने शनिः भवेत् इत्येव नियमः । अन्ये ग्रहाः तत्तद्भावेषु ।

# राजयोगाः

## प्रथमः योगः

<table>
<tr><td></td><td>चन्द्रः</td><td>शनिः</td><td></td></tr>
<tr><td></td><td colspan="2" rowspan="2">मेषूरणायतनुगाः<br>शशिमन्दजीवाः<br>ज्ञारौ धने सितरवी हिबुके<br>नरेन्द्रम्॥ १८॥</td><td>लग्नम्<br>गुरुः</td></tr>
<tr><td></td><td>कुजः<br>बुधः</td></tr>
<tr><td></td><td></td><td>रविः<br>शुक्रः</td><td></td></tr>
</table>

## द्वितीयः योगः

<table>
<tr><td></td><td>गुरुः</td><td></td><td>शुक्रः</td></tr>
<tr><td></td><td colspan="2" rowspan="2">वक्रासितौ<br>शशिसुरेज्यसितार्कसौम्या<br>होरासुखास्तशुभखाप्तिगताः<br>प्रजेशम् ॥ १८॥</td><td>रविः</td></tr>
<tr><td>चन्द्रः</td><td>बुधः</td></tr>
<tr><td></td><td></td><td>लग्नम्<br>कुजः<br>शनिः</td><td></td></tr>
</table>

उभयत्रापि अयं विशेषः – यः कोऽपि वा राशिः लग्नं भवतु, लग्नात् अभीष्टेषु स्थानेषु यथासम्भवं तत्तद्ग्रहाः भवेयुः ।

राजयोगप्राप्तिकालः –

कर्मलग्नयुत..... परिकल्प्या ॥१९॥

राजयोगकर्तृणां ग्रहाणां मध्ये यः ग्रहः कर्मभावे अथवा लग्नभावे भवति तस्य दशायाम् अन्तर्दशायां वा राज्यप्राप्तिः (राजयोगस्य प्राप्तिः) भवति। यदि बहवः ग्रहाः लग्नदशमयोः भवन्ति तर्हि तेषु यः बलिष्ठः तस्य दशान्तर्दशायां राजयोगस्य प्राप्तिः भवति।

प्राप्तमपि राज्यं शत्रुक्षेत्रस्थस्य नीचक्षेत्रस्थस्य वा ग्रहस्य दशायां (इयं छिद्रदशा इति उच्यते) विनष्टं भवति। अर्थात् शत्रुक्षेत्रस्थस्य ग्रहस्य दशान्तर्दशायां शत्रूणाम् आक्रमणम्, नीचक्षेत्रस्थस्य ग्रहस्य दशान्तर्दशायां राज्ये आपत् (धन-धान्यहानिः अतिवृष्ट्यनावृष्ट्यादिबाधाः वा) सम्भवति।

## योगविशेषः -

गुरुसितबुधलग्ने..... जन्म विन्द्यात् ॥२०॥

येषां जातके बुधः, गुरुः शुक्रः वा लग्ने भवति, लग्नात् सप्तमे शनिः, दशमे च रविः भवति ते भोगान्विताः=सर्वदा सुखिनः भवन्ति।

| | | | |
|---|---|---|---|
| रविः | | | लग्नम् बुधः/गुरुः/ शुक्रः |
| | | | |
| | | | |
| शनिः | | | |

## योगविशेषः -

## शुभबलयुतकेन्द्रैः ….. अर्थभाक्क ॥२०॥

येषां जातके शुभराशयः(शुभग्रहाः येषां राशीनाम् अधिपाः ते राशयः) केन्द्रभावे , पापराशिषु पापग्रहाश्च यदि भवन्ति ते वनचराणां चोराणां वा अधिपाः धनवन्तः च भवन्ति ।

| | | | |
|---|---|---|---|
| चन्द्रः | कुजः | | लग्नम् |
| | | | |
| शनिः | | | रविः |
| | | शुक्रः<br>गुरुः | बुधः |